परामर्श

प्रत्यभिति विचारः

१२७३

न्याय

खंड ७

अनुमितिपरामर्शविचार

१५००

१ श्रीसिद्धेश्वर्यै नमः ॥ नत्वा शिवं नवशीत्वा महादेवेन धीमता ॥ निरूप्यते परामर्शोऽनुमाहेतुत्वमद्भुतं ॥ १ ॥ सत्यपि पक्षतादिरू
पसकलानुमितिसामग्रीसमवधाने परामर्शं विनाऽनुमित्यनुदये नानुमितिं प्रति परामर्शो हेतुः ॥ स च व्याप्तिविशि
ष्टपक्षधर्मताज्ञानरूपः ॥ व्याप्तिश्च स्वव्यापकसाध्यसामानाधिकरण्यरूपा ॥ तथा च पर्वतो वह्निमानित्याद्यनुमितौ धूम
व्यापकवह्निसमानाधिकरणधूमवान्पर्वत इत्याद्याकारकपरामर्शो हेतुरिति फलितमिति सिद्धान्तः ॥ अत्र केचित् पर्वतो
वह्निमानित्याद्यनुमितौ पर्वतीयधूमव्यापको वह्निरित्याद्याकारक एव परामर्शो हेतुः न तूक्तः तद्धेतुत्वे कारणतावच्छेदक
कोटौ सामानाधिकरण्यविषयतानिवेशाधिक्ये गौरवापत्तेः ॥ अथ भवन्मते पर्वतीयधूमसमानाधिकरणाभावप्र
तियोगितावच्छेदकत्वत्वावच्छिन्नाभावादिघटितव्यापकतावगाहिज्ञानस्यैव हेतुत्वं फलितं एवं च शुद्धधूमसमाना
धिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावघटितव्यापकत्वावगाहि धूमव्यापकवह्निसमानाधिकर रा०म०
णधूमवान्पर्वत इत्याद्याकारकोपदर्शितपरामर्शकालेऽनुमित्यापत्तायां भवन्मते दुरुद्धर एवेति चेन्मैवं ॥ नहि व १

संपर्वतीयधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावादिघटितव्यापकतावगाहिज्ञानत्वेन
हेतुत्वमङ्गीकुर्मो येनोक्तानुपपत्तिः स्यात् अपितु धूमाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रति
योगितासंबंधावच्छिन्नायापर्वतीयधूमाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नप्रकारतातन्निरूपि
ताभावनिष्ठविषयतानिरूपितवह्नित्वनिष्ठविषयतानिरूपितावच्छिन्नत्वनिष्ठविषयतानिरूपितवह्निनिष्ठविषय
ताशालिज्ञानत्वेन हेतुत्वं वदामस्तत्र च न काचिदनुपपत्तिः उपदर्शितपरामर्शे तथाविधाभावप्रतियोगितावच्छेदक
तादृशावच्छेदकत्वत्वघटकतया पर्वतीयत्वस्याभानेऽपि तथाविधप्रतियोगिविशेषणतावच्छेदकाक्रान्ततया तस्मा
दनुमित्युत्पत्तिसंभवेनानुमित्यपलापाभावात्॥ अथ भवन्मतेऽपि अव्याप्यवृत्तिकपिसंयोगादीनां व्यापकत्वोप
पन्नये हेत्वधिकरणवृत्त्यभावे स्वप्रतियोग्यनधिकरणवृत्तित्वरूपप्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयत
यापर्वतादावुद्देश्यकगगनादिसाध्यकानुमित्यापत्तिः तत्र गगनाभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या स्वप्रति

२ योग्यनाधिकरणवृत्तित्वरूपप्रतियोगिवैयधिकरण्यासंभवेन तादृशघटाभावप्रतियोगितानवच्छेदकत्वस्य गगनत्वे सत्त्वात् ज्ञा
पि तथाविधव्यापकत्वज्ञानसंभवादिति सामानाधिकरण्यविषयताऽवश्यमनुमितिजनकतावच्छेदककोटौ निवेशनी
येति चेन्न गगनादाववृत्तित्वज्ञानकालेऽनुमितिरापाद्यते न तु भ्रमकाले वाऽनापत्तेः॥ तदानीमवृत्तित्वग्रहरूपप्रतिबंधक
सत्वेनानुमित्यापादनासंभवात्॥ नातः इष्टापत्तेः॥ यद्वा तद्वाहणापकारणतावच्छेदककोटौ व्यापकांशे वृत्तिमत्त्वमेव नि
वेशनीयं न तु सामानाधिकरण्यमपि गौरवात्॥ वस्तुतस्तु अव्याप्यवृत्तिकपिसंयोगादीनां व्यापकत्वोपपत्तये हेत्वधि
करणवृत्त्यभावे निरूक्तप्रतियोगिवैयधिकरण्यं न निवेश्यते किंतु व्याप्यवृत्तित्वे वृत्तित्वे स्वप्रतियोगिमत्त्वाग्रहविरोधिता
नियामकसंबंधावच्छिन्नत्वं वा निवेश्यते एवं च न गगनादिवृत्तिसाध्यकानुमित्यापत्तिसंभावनापीति ध्येयं॥ न च तथा
पि व्यापकतावगाहिज्ञानहेतुतामते हेतौ साध्यसामानाधिकरण्यसंदेहदशायां तद्व्यतिरेकनिर्णयदशायां चानु राम०
मित्यापत्तिरिति वाच्यं॥ तादृशसंशयदशायामनुमित्सुतादशेष्टापत्तेः॥ तादृशव्यतिरेकनिर्णयदशायां हेतौ पक्षध २

र्मताज्ञानीश्वरहेहेतौपक्षीयत्वावच्छिन्नव्यापकतानिर्णयरूपपरामर्शाभावादेवानुमित्यापत्तेरभावात्। हेतौपक्षधर्मताज्ञा
नसत्वेव साध्यासमानाधिकरणधर्मान्तरग्रहे च तादृशव्यतिरेकनिर्णयस्यापि अनुमितौ विरोधित्वस्य तथा व्यावश्यकत
याविरोधित्वेनानुमित्युत्पादनासंभवात् तत्त्वयातादृशव्यतिरेकनिर्णयस्यानुमितौ विरोधित्वानभ्युपगमे तु ममापि
तदानीमनुमित्याविशेषपत्तेः॥ ननु भवन्मते वह्निसामानाधिकरण्याभावप्रकारकधूमविशेष्यकमानसशाब्दबोधादे
पर्वतपक्षकवह्न्याद्यनुमितिसामग्र्याः प्रतिबंधकत्वस्याधिकस्य कल्पनीयतया गौरवं मन्मते तु अनुमितिसाम
ग्रीकाले व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्तापरामर्शस्यावश्यकतया तस्य बाधनिर्णयमुद्रयातत्र
प्रतिबंधकतायाः क्लृप्तत्वात्तेनैव तदानीमुपदर्शितोपनीतभानास्यानुत्पादोपपत्तौ तादृशसामग्रीप्रतिबंधकतायास्त
त्राकल्पनात् लाघवं। न च व्यापकताज्ञानहेतुतावादिमीमांसकमते एकदाज्ञानद्वययोगपद्याभ्युपगमे न कुत्रापि ज्ञा
नसामग्र्याः प्रतिबंधकत्वकल्पनमेव नास्तीति वाच्यं॥ प्रत्यक्षादौ भिन्नविषयकानुमितिसामग्र्याः प्रतिबंधक

२ त्वस्य प्राभाकराणामपि संमतत्वेन अन्येषां तदंगीकारस्य सुतरां सिद्धत्वात् अन्यथा वन्हिव्याप्यो धूमो धूमवांश्च पर्वत इत्यादि
ज्ञानसत्त्वे अनुमितिसामग्र्या वृत्तत्वेन तदुत्तरं प्रत्यक्षात्मकविशिष्टपरामर्शस्यासंभवेन नैयायिकमते अनुमितिविशि
३ ष्टपरामर्शयोः कार्यकारणभावव्यभिचारः प्रदर्शकस्य प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्वादनुमितिरेवोत्पद्य
तेन तु व्याप्याभेदप्रत्यक्षमिति परामर्शीयथीयज्ञानद्वयहेतुतावादिमीमांसकमतोपन्यासस्य मणिकारलिखितस्यानुप
पत्तेः॥ तस्मान्मीमांसकमतेपि प्रत्यक्षादौ भिन्नविषयकानुमितिसामग्र्याः प्रतिबंधकत्वस्यावश्यकत्वे नोपदर्शितमान
सादावनुमितिसामग्र्याः प्रतिबध्यप्रतिबंधकभावकल्पनप्रयुक्तगौरवं दुष्परिहरमेवेति चेन्न मन्मते तथाविधकिंप प्र
तिबध्यप्रतिबंधकभावाधिक्येपि पर्वतः पर्वतीयधूमव्यापकवन्हिसमानाधिकरणाप्रामाण्यविशिष्टवन्ह्यभाववत्प
र्वतज्ञानकालीनघटादिमानित्यनंतानुमितिसामग्र्याः अनंतघटपटादिविषयकप्रत्यक्षप्रतिप्रतिबंधकत्वाकल्प राम० ३
नेन लाघवस्यानपायात् स्थाने मन्मतेपर्वतो वन्हिमानित्यनुमितिसामग्र्याः अनंतक्षप्रघटपटादिप्रत्यक्षप्र

वन्हित्वावच्छिन्नविषयतानिरूपितसामानाधिकरण्यत्वावच्छिन्नविषयतानिरूपितधूमत्वावच्छिन्नविषयतानिरूपित प ५

तिबंधकताकाणाश्रवणसत्वेनैव घटपटादिप्रत्यक्षापत्तितादवस्थ्यमेवेन तत्र्यातिरिक्तप्रतिबध्यप्रतिबंधकभावाकल्पना
त्।। भवन्मते तु तत्रातिरिक्तप्रतिबध्यप्रतिबंधकभावकल्पनमावश्यकमेव तदानीं भवन्मते पर्वतो वन्हिमानिति सानुमि
तिसामग्र्या अनावश्यकत्वे नलक्षणेन निर्वाहासंभवादिति भवन्मतेपि उपदर्शितप्रतिबंधकताकल्पनप्रयुक्तगौरवं
दुष्परिहरमेव।। किं च भवन्मते एवं हेतुतावच्छेदकभेदेन परामर्शहेतुतायाम् अनुमितिसामग्रीप्रतिबंधकतायां च बाहुल्या
द्दोस्त्व।। तथाहि।। भवन्मते धूमत्वावच्छिन्नविषयतानिरूपितव्यापकत्वत्वावच्छिन्नविषयतानिरूपितवन्हित्वाद्यवच्छिन्न
विषयताशालिनिर्णयत्वेन आलोकत्वावच्छिन्नविषयतानिरूपितव्यापकत्वत्वावच्छिन्नविषयतानिरूपितवन्हि
त्वावच्छिन्नविषयतानिरूपितसामानाधिकरण्यत्वावच्छिन्नविषयतानिरूपितालोकत्वावच्छिन्नविषयतानिरूपित
पर्वतत्वावच्छिन्नविषयताशालिनिर्णयत्वादिना च धूमालोकादिलिंगकपरामर्शानां विशिष्य तत्तल्लिंगकानुमि
तिहेतुत्वं सिद्ध्यभावादिविशिष्टताद्दशनिर्णयत्वादिनाऽनुमितिसामग्र्याः घटपटादिप्रत्यक्षप्रतिबंधकत्वं च वा

४ च्यं॥ नचमन्मते किंचिद्धर्मावच्छिन्नविषयतात्वेनैव हेतुविषयतानां निवेश इति वाच्यं॥ तथा सत्यालोकव्यापकवह्निसमा
नाधिकरणधूमवान्पर्वत इत्यादिनिर्णयकाले वह्न्यादिविधेयकानुमित्यापत्तेः॥ तादृशनिर्णयसत्वे भिन्नविषयकप्र
त्यक्षाद्यनुत्पादापत्तेश्च। एवं च विशिष्टधूमत्वालोकत्वाद्यवच्छिन्नविषयतानिवेशेऽस्मन्मते हेतुतावच्छेदकभेदेनानं
तकार्यकारणभावकल्पनेनानंतानुमितिजनकतावच्छेदककोटौ हेतुविषयतानां सकृदेव निवेशे न तत्र किंचिद्धर्मा
वच्छिन्नविषयतात्वेन तासां निवेशो धर्मिकाभावान्न हेतुतावच्छेदकभेदेन कार्यकारणभावादिबाहुल्यमिति॥ न च व्या
पकसामानाधिकरण्यज्ञाने हेतुतामतेपि स्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्ननिरूपितसामा
नाधिकरण्यावच्छिन्नत्वस्वावच्छिन्नत्वोभयसंबंधेन किंचिद्धर्मविशिष्टप्रकारतात्वेन निखिलहेतुप्रकारताः अ
नुगमय्य तादृशप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताशालिनिर्णयत्वेनैव हेतुत्वमुच्यत इति नैतन् रास०
न्मतेपि हेतुतावच्छेदकभेदेन कार्यकारणभावादिबाहुल्यमिति वाच्यं॥ नीलधूमव्यापकवह्निसमानाधिक ४

णाधूमवान्पर्वत इतिज्ञानादप्यनुमितिप्रसंगात्॥ तन्नीलधूमत्वस्य धूमत्वानतिरिक्तत्वेन पर्वतत्वावच्छिन्नविशेष्यता
निरूपितधूमनिष्ठप्रकारतायां धूमत्वस्य प्रथमसंबंधसत्त्वात् धूमत्वस्य तादृशप्रकारतावच्छेदकत्वेन द्वितीयसंबंधसत्त्वा
च्च॥ यदि च साध्यतावच्छेदकैर्यावत्त्वस्यावच्छिन्नव्यापकतावच्छेदकत्वनिवेशे इंधनव्यापकवन्हिसमानाधिकरणें
धनवान्पर्वत इत्यादिज्ञानादनुमित्यनुपपत्तिस्तत्र वन्हित्वे इंधनत्वाव्यापकतावच्छेदकत्वाभावात् न तद्वारणाय स्वाव
च्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नत्वे स्नेन स्वनिष्ठावच्छे
दकतानिरूपितहेतुनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपिताधेयत्वनिष्ठावच्छेदकता
निरूपिताभावनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदक
तानिरूपिताभावनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदक
तानिरूपिताभावनिष्ठावच्छेदकतानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदक

का

५ तन्निरूपिताधिकरणतानिष्ठावच्छेदकतानिरूपिताधेयत्वनिष्ठावच्छेदकतानिरूपितत्वं विवक्षणीयं तत्र च स्वनिष्ठावच्छे
5 दकताघटकनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन किंचिन्निष्ठावच्छेदकताविशिष्टान्यत्वं निवेशनीयमिति न
नीलधूमव्यापकवन्हिसमानाधिकरणधूमवान्पर्वतइत्यादिज्ञानादनुमित्यापत्तिस्तत्र धूमत्वनिष्ठावच्छेदकताया
निरुक्तसंबंधेन नीलत्वनिष्ठावच्छेदकताविशिष्टत्वेन तदन्यत्वाभावादिति विभाव्यते तदा नीलधूमव्यापकवन्हिसमा
नाधिकरणनीलधूमवान्पर्वत इत्यादिज्ञानासंग्रहप्रसंगः तस्यस्वरूपांतरेण स्वांतर्भावेण कारणतांगीकारे तु किं
चिद्विशेषणविशिष्टाविशिष्टयोर्हेतुभेदेन भवन्मते कार्यकारणभावभेदो कार्यकारणभावभेदस्यैव दुष्परिहरत्वादे
वानवच्छिन्नप्रतियोगित्वनिर्वचनाद्यनुरोधेनोभयत्रेपि कल्पनमिति वाच्यं ।। तथाप्येतन्नानुमितिसामग्रीप्रतिबंधक
तावच्छेदककोटौ सामानाधिकरण्यावगाहित्वस्य तादृशोपाध्याभावज्ञानाभावस्य वा निवेशेन व्यापकताज्ञा व्या०
नहेतुतावादिमते एव लाघवसंभवादिति वदंति ।। तदसत् ।। अभावप्रत्यये प्रतियोग्यंशे यादृशो धर्मः प्र ५

कारविधयाभासत्वे तद्धर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेनैव प्रतियोगिनोऽभावांशे भानमिति नियमेन धूमव्या
पकवह्निविषमानाधिकरणधूमवान् सर्व इत्यादिज्ञाने उपदर्शितरीत्या धूमांशे पर्वतीयत्वादिरूपलक्षणविधया
भानासंभवेन व्यापकताज्ञाने हेतुतावादिमते तादृशज्ञानादनुमितेरपलापस्य दुरुद्धरत्वात्॥ न च तादृशनिय
मे मानाभाव इति वाच्यं॥ प्रतियोगिनोऽभावांशे निरुक्तसंबंधेनैव भानस्यानुभवसिद्धतया तादृशनियमांगी
कारस्यावश्यकत्वात् अन्यथा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्याप्यतिरिक्तस्य सिद्ध्यापत्तेः न हि
तत्र तथाविधनियमादस्मदृष्टं तरं किंचिद्बाधकमस्ति॥ न चेष्टापत्तिः। तादृशातिरिक्ताभावकल्पने गौ
रवप्रसंगेन तथा वक्तुमशक्यत्वात्॥ ननु प्रतियोग्यंशे प्रकारीभूतो यो धर्मस्तद्धर्मस्यैव प्रतियोगितावच्छेदक
त्वया भानमित्येव नियमः। लौकिकिपतेतावतैव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववारणासंभवा
त् न तत्पूर्वोपदर्शितनियमोऽपि मानाभावात् अत एव लघुसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारि

६ 6 णपतितमात्रनिवारणाय स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वमिति पारिभाषिकावच्छेदकत्वघटितव्या
प्तिलक्षणे स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकघटतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्य
अनवच्छेदकत्वात्तेनाविवक्षणप्रदर्शकः प्रतियोगिता स्वविशिष्टोपदेश्या इति व्याप्तिसिद्धांतलक्षणे यदीधितिग्रंथो
पि संगच्छते अन्यथा तत्रापि स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वघटकानां पदार्थानामुपलक्ष
णविधया निवेशासंभवेन तादृशग्रंथस्यासंगतत्वापत्तेः॥ वस्तुतस्तु प्रतियोगितांशे प्रकारीभूतइत्यादिनियमे
पि मानाभावः॥ प्रामाणिकगौरवस्यादोषत्वात् पाऽनुभवबलाद्यातातिरिक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगि
ताकाभावांगीकारे बाधकाभावात् अतएव यद्धि पुनस्सानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीत्यादि
रनुभवो न तदा तादृशाभावनिवारणां गीर्वाणगुरूणामपि शक्यमित्युक्तं दीधितिकारेणापि। एवंवधूमव्यापकव राम०
ह्निसमानाधिकरणधूमवान्पर्वतइत्यादितानेधूमांशेऽपलक्षणविधयापर्वतीयत्वमानेबाधकाभावेन ६

तादृशज्ञानादनुमित्यपलापवारणासंभवेन व्यापकताज्ञानहेतुतावादिमते न कोपि दोष इति वदन्ति नव्याः। यदि व्या
पकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्तावगाहिपरामर्शस्य हेतुत्वकारणात्वमंगीक्रियते तत तदेवोपदर्शितं तदीसा
गौरवस्य प्रसंगेन लाघवात् व्यापकतावगाहि पर्वतीयधूमव्यापको वह्निरित्याद्याकारकपरामर्शस्य हेतुत्वं प्रस
ज्यते तदेव न किं तु साध्याभाववद्वृत्तित्वरूपव्याप्तिविशिष्टहेतुमत्तावगाहिपरामर्शस्यैव हेतुता स्वीक्रियते न तत्र
च न किमपि गौरवं संभवति प्रकृतव्यापकत्वापेक्षया साध्याभाववद्वृत्तित्वस्य लघुशरीरतया लाघवेन तदवगाहिप
रामर्शस्यैव हेतुत्वौचित्यमिति वदन्ति। नन्वेतन्मते केवलान्वयिन्यभिधेयत्वादिसाध्यकानुमित्यनुपपत्तिः। तत्र वाच्य
त्वादिरूपसाध्याभावाप्रसिद्ध्या साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शासंभवात्। न च तत्र वक्तृगतसा
ध्याभावाप्रसिद्धावपि स्वाभावांशे प्रतियोगितासंबंधेन वाच्यत्वादिरूपसाध्यावगाहिनाभ्रमात्मकपरा
मर्शस्य संभवेन नानुपपत्तिरिति वाच्यं।। तथाप्यभावो न वाच्यत्वीयदृत्याद्याकारकप्रतियोगितासंबंधावच्छि

७ न्नप्रतियोगिताकवाच्यत्वाद्यभावप्रकारकाभावविशेष्यकबाधनिर्णयरूपविशेषदर्शनकाले भ्रमात्मकपरामर्शस्याप्य
संभवेनानुपपत्तितादवस्थ्यात्॥ अथैकधर्मिधर्मितावच्छेदकीकृत्यविरुद्धभावाभावोभयप्रकारकनिर्णयानभ्युप
गमेनाभावत्वंधर्मितावच्छेदकीकृत्यवाच्यत्ववाच्यत्वाभावोभयप्रकारकस्याभावो न वाच्यत्वीयवृत्ताकारकनिर्णयस्या
सभावेनोपदर्शितानुपपत्त्यसंभवः॥ तथाहि॥ अभावत्वंधर्मितावच्छेदकीकृत्यप्रतियोगितासंबंधेनवाच्यत्वादि
भानप्रतिबंधिका अभावत्वावच्छेदेन प्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावप्रकारिकानिश्च
यात्मकबुद्धिरेव तस्याश्चासंभवः॥ यतस्तस्याः अभावत्वावच्छिन्ने प्रतियोगितासंबंधावच्छिन्नप्रतियोगितासंबंधे
नवाच्यत्वादिविशिष्टेऽभावे भासमानेऽभावत्वविशिष्टे विशेषणतया प्रतियोगितासंबंधावच्छिन्नप्रतियोगिता
संबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावनिष्ठपरस्परकार्यकाले सत्त्वात्समानप्रकारकनवाच्यत्वादिभान एम०
मावश्यकं तस्य च भानं न संभवतीति तद्धानविरोधिनोऽभावत्वावच्छेदेन स्वात्मकस्य प्रतियोगितासंबंधावच्छिन्न ७

प्रतियोगिताकवाय्वत्वाद्यभाववन्निश्चयस्य कार्यकाले सत्त्वात् समानप्रकारकत्वे नैव ज्ञानस्य प्रतिबंधकतया तस्य भि-
न्नधर्मिकत्वेपि प्रतिबंधकत्वात्।। नन्वभूतलादौ शुद्धसंयोगसंबंधावच्छिन्नप्रतियोगिताकघटाद्यभाववन्निश्चयस-
त्त्वेपि संयुक्तसंयोगादिरूपपरंपरासंबंधेन घटादिप्रकारकज्ञानोत्पत्त्या शुद्धतत्संसर्गकतद्विशिष्टबुद्धावेव तत्सं-
बंधावच्छिन्नप्रतियोगिताकतदभाववन्निश्चयस्य प्रतिबंधकत्वं स्वीकरणीयम् एवं चाभावत्वावच्छेदेन प्रतियोगितासं-
बंधावच्छिन्नप्रतियोगिताकवाय्वत्वाभाववन्निश्चयकाले पिञ्जभाववत्त्वविशिष्टे प्रतियोगितासंबंधावच्छिन्नप्रति-
योगिताकसंबंधेन वाय्वत्वादिभाने बाधकाभाव इति वाच्यं।। तत्संबंधावच्छिन्नप्रतियोगिताकतदभाववन्निश्चयप्र-
तिबध्यतावच्छेदककोटौ शुद्धतत्संसर्गकत्वनिवेशे भूतलादौ संयोगादिसंबंधावच्छिन्नप्रतियोगिताकघटा-
द्यभाववन्निश्चयदशायां भूतलत्वव्यापकत्वादिविशिष्टसंयोगादिसंबंधेन घटादिविशिष्टबुद्ध्यापत्तेः।। न चो-
क्तदोषः तद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्संबंधीयसांसर्गिकविषयतानिरूपिततत्तद्धर्मावच्छिन्नप्रका-

८
१८ रत्तापामवतद्धर्मावछिन्नविशेष्यकतत्संबंधावछिन्नतद्धर्मावछिन्नप्रतियोगिताकाभावनिश्चयप्रतिबध्यतावछे
दकतोपगमात संयुक्तसंयोगादिपरंपरासंबंधस्य लेवमूतलत्वाद्यवछिन्नविशेष्यतानिरूपितसंयोगादिसांस
र्गिकविषयतानिरूपितवृक्षसंयुक्तत्वादिनिष्ठसांसर्गिकविषयतायामेवसत्वे नघटत्वाद्यवछिन्नप्रकारतायामस
त्वेनानुपपत्यभावादितिचेन्न॥ अभावांशे प्रतियोगितासंबंधेनवाच्यत्वादिरूपप्रतियोगिभानप्रतिबंधकस्याभा
वोनवाच्यत्वापरस्याद्याकारकनिश्चयस्योक्तयुक्त्या संभवेपि अभावः प्रतियोगितासंबंधेनवाच्यत्ववतोभिन्न इत्या
द्याकारकस्यतत्प्रतिबंधकनिश्चयस्यसंभवात्तत्स्याभाववत्वविशिष्टेप्रतियोगितासंबंधेनवाच्यत्वाधप्रकारकत्वादि
तिचेन्नैवं। उक्तविशेषदर्शनकालेकेवलान्वयिवाच्यत्वादिसाध्यकानुमितेरनभ्युपगमात॥ अभावत्वावछेदे
नहेतुसामानाधिकरण्यभावग्रहदशायामनुमित्यनभ्युपगमस्याव्यापकत्वाद्व्याप्तिपरामर्शहेतुतावादिनामव्या राम०
वश्यकतयाक्षचित्कत्वापत्ताय स्यंपक्षसाम्यताप्रत्युप्रतियोगितासंबंधेनसाध्यीयोयस्तद्वद्वृत्तित्वरूपव्याप्त्य ८

वगाहिपरामर्शस्यानुमितिहेतुर्नतुतत्त्वाभाववत्त्वांशस्यापिनिवेशोगौरवाद्व्याप्यनाभावाच्च एवंचोक्तविशेषदर्शन
कालेपिवाच्यत्वांशेनिर्धर्मितावच्छेदकस्यानिरुक्तव्याप्यवगाहिपरामर्शस्यसंभवेनकेवलान्वयिवाच्यत्वादिसा
ध्यकानुमित्युत्पत्तौनकिंचिद्बाधकमितितदसत्।तद्धर्मावच्छिन्नविशेष्यकस्यतत्संबंधावच्छिन्नावृत्तित्वप्र
कारकस्यतत्संबंधाभावप्रकारकस्यवानिश्चयस्यतेनसंबंधेनतद्धर्मावच्छिन्नप्रकारकनिश्चयेधर्मितावच्छेदकत्वानं
प्रत्यपिप्रतिबंधकतयाप्रतियोगितयावाच्यत्वमवृत्तिवाच्यत्वमप्रतियोगीत्यादिनिरुक्तिप्रकालेप्रतियोगित
यावाच्यत्वादिप्रकारकनिर्धर्मितावच्छेदकज्ञानस्याप्यसंभवेनमदुक्तरीतेरेवानुसरणीयत्वात्।ननूक्तविशे
षदर्शनक्षणकालेपिकेवलान्वयिवाच्यत्वादिसाध्यकानुमित्यनुपपत्तिः।नचतदानीमभावांशेप्रतियोगि
तयावाच्यत्वादिप्रकारकभ्रमात्मकपरामर्शादनुमितिःसंभवतीत्युक्तमेवेतिवाच्यं॥साध्यतावच्छेदका
तिरिक्तधर्मावच्छिन्नप्रतियोगिताकंसाध्यतावच्छेदकसंबंधातिरिक्तसंबंधावच्छिन्नप्रतियोगिताकंचसाध्या

९ भावमादायासंभववारणाय साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावस्यै
९ वसाध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतयावाच्यत्वत्वाद्यवच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या तादृश
धर्मानुपपत्तेः॥ न च प्रतियोगितांशे वाच्यत्वत्वाद्यवच्छिन्नत्वस्वरूपसंबंधावच्छिन्नत्वयोरेवाप्रसिद्ध्योर्धर्मासंभव इति वाच्यं।
तेषां संबंधघटकतया तदभाववद्विशेष्यकत्वतत्प्रकारकत्वघटिततद्धर्मतानुपपत्तेः॥ न च येन रूपेण प्रतियोगि
ताप्रकारक एवात्र भ्रमो विवक्षितो न तु तदवच्छिन्नप्रतियोगितासंसर्गक इति वाच्यं॥ लाघवात्प्रतियोगितासं
सर्गकज्ञानस्यैवानुमितिहेतुत्वेन तत्प्रकारकज्ञानस्यानपेक्षितत्वादिति चेन्न॥ लाघवेन स्वावच्छिन्नसाध्य
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकविशिष्टाभावस्यैव साध्याभाववद्वृत्तित व्या०
त्वरूपव्याप्तिघटकतया घटत्वप्रकारकप्रमाविशेष्यत्वत्वादेः प्रसिद्धेन स्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्र ९
तियोगिताकत्वरूपव्यधिकरणसंबंधेन वाच्यत्वत्वादेरभावांशे भ्रमात्मकपरामर्शस्यासंभवेनानुपपत्त्यभा

तात्मायत्र एव साध्याभाववदवृत्तित्वरूपव्याप्यवगाहिपरामर्शस्यानुमितिहेतुत्वे विशिष्टस्यानतिरिक्ततयाद्व
त्ताभाववदवृत्तित्वस्याविशिष्टसत्वेः सत्वेन तादृशव्याप्यवगाहिपरामर्शस्यासंभवेन द्रव्यत्वसाध्यकवि
शिष्टसत्ताल्लिंगकानुमित्यनुपपत्तिः॥ एवं जातिमान्सत्वादित्यादावपि जात्यभाववति सामान्यादौ हेतुता
वच्छेदकसमवायादिसंबंधेन वृत्तित्वस्याप्रसिद्धत्वेन तादृशव्याप्यवगाहिपरामर्शस्यासंभवेन जात्यादिसाध्यक
सत्तादिलिंगकानुमित्यनुपपत्तिरित्यपि प्रत्युक्तं। तत्रापि तादृशव्याप्यवगाहिप्रमात्मकपरामर्शासंभवे विभ्र
मात्मकपरामर्शादेवानुमित्युपगमे न तत्र विशेषदर्शनकालेवानुमितेरनुपगमेनानुपपत्त्यभावात्॥ अत
एव केवलान्वयिग्रंथे उपदर्शितमपि केवलान्वयिनः साध्यमिति दीधितिकारेण प्रत्युक्तं॥ एतेन साध्याभावव
दवृत्तित्वरूपव्याप्यवगाहिपरामर्शेनानुमितिहेतुः तथा सति परार्थानुमानस्थले यो यो धूमवान् स व
ह्निमानित्याद्युदाहरणवाक्यप्रयोगानुपपत्तेः तथाहि तादृशवाक्याद्धूमादिसमानाधिकरणाभावप्रति

१० 10 योगितानवच्छेदकत्वात् रूपव्यापकतावच्छेदकत्वमेव वन्हित्वादौ प्रतीयते न तु धूमादौ वन्हित्वाद्यवच्छिन्नाभाववद्वृत्तित्वं
यद्यदभिधेयं तत्तत्प्रमेयमित्याद्युदाहरणवाक्ये प्रमेयत्वत्वाद्यवच्छिन्नाभावाप्रसिद्ध्या तादृशप्रतीत्यसंभवात् एवं चोदाह
रणवाक्यस्यानुमितिकारणानुपयोगित्वेन तत्प्रयोगस्य नैरर्थक्यापत्तिरिति व्यापकत्वावगाहिपरामर्शहेतुत्वमेव स
मीचीनं ॥ अथ तादृशवाक्यात्कथं निरूढव्यापकतावच्छेदकत्वप्रतीतिः तस्यापदार्थत्वेन प्रकारतयाभानासंभवात्
॥ न च यत्पदोत्तरयत्पदरूपवीप्साया अर्थस्य निरूढव्यापकतावच्छेदकत्वस्य वन्हित्वादावन्वयात्तथा प्रतीतिरूपयद्यतदिति वाच्यं
॥ नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नविरुद्धत्वात्तथान्वयासंभवात् ॥ न च वन्ह्यादिपदेन शक्त्योपस्थापिते वन्हित्वादौ लक्ष
णयोपस्थापितस्य निरूढव्यापकतावच्छेदकत्वस्यान्वयात्तथा प्रतीतिः नामद्वयार्थयोरेव भेदेनान्वयस्याव्युत्पन्नविरुद्ध
त्वात् एकनामार्थयोर्भेदेनान्वयस्य तत्संभावात्मयुगपद्वृत्तिद्वयविरोधस्य चानभ्युपगमादिति वाच्यं ॥ गंगात्तीत्यादिवा रामं०
क्यात्संयोगेन प्रवाहवत्तीरमत्तीत्याद्यनुभवस्य सर्वानुभवविरुद्धत्वात् एकपदद्वृत्तिद्वयोपस्थाप्यार्थयोः परस्परमन्व १०

यस्याप्युत्पत्तिविरुद्धतया तथान्वयासंभवादिति चेन्न मुख्यविशेष्यरूपनामार्थयोरेवाभेदेनान्वयस्याव्युत्पत्तिविरुद्धतया
तथान्वयासंभवेन वीप्सार्थस्य व्यापकतावच्छेदकस्यैवाभेदेन वह्नित्वादावन्वयासंभवेन वा तथा प्रतीत्युपपत्तेः॥ वस्तुत
स्तु व्यापकतावच्छेदकत्वं न वीप्सार्थः गौरवात् किंतु यो यो धूमवान् स वह्निमानित्याद्युदाहरणवाक्यस्य वीप्सादिसम
भिव्याहारे लोदेश्यतावच्छेदकधूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नवत्प्रतियोगिकत्वविशिष्टाभेदसंबंधेन
वह्निमदादिप्रकारकधूमवदादिविशेष्यकबोधजनकत्वाभ्युपगमेन तथा प्रतीत्युपपत्तेः॥ यदि च यो यो वह्निमान् स धू
मवानित्यादिवाक्यस्याप्रामाण्यानुरोधेन वह्न्यादिव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नवत्प्रतियोगिकत्वविशिष्टाभेद
संबंधेन धूमवदादिप्रकारकबोधजनकत्वमवश्यं स्वीकरणीयं एवं च यो यो वह्निमान् स न धूमवानित्यादिनञ्पदघ
टितवाक्यस्याप्यप्रामाण्यापत्तिः तस्य वह्न्यादिव्यापकतावच्छेदकधूमत्वादेरप्रसिद्ध्या तद्घटितनिरुक्तसंबंधावच्छिन्न
प्रतियोगिताकाभावबोधकत्वासंभवादिति विभाव्यते तथापि न क्षतिः यो यो धूमवान् स वह्निमानित्यादिवाक्ये स्व

११ समानाधिकरणाभावप्रतियोगितावच्छेदकत्वसंबंधावच्छिन्नस्वानिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वपर्यवसितस्वव्या
पकतावच्छेदकत्वसंबंधेन धूमादिविशिष्टो यो धर्मस्तदवच्छिन्नप्रतियोगिताकत्वसंबंधेन मतुवर्थघटकसंयोगादिसंबं
धेन मतुप्प्रकृत्यर्थस्य वह्नित्वविशिष्टे द्रव्ये यो व्युपगमेन तादृशप्रतीतिनिर्वाहात्। यो यो वह्निमान् स धूमवानित्यादौ च धू
मत्वादौ वह्न्यादिनिरूपितव्यापकतावच्छेदकत्वसंबंधेनासत्त्वेन निरूपितव्यापकतावच्छेदकत्वसंबंधेन वह्न्यादिविशिष्ट
वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वे वह्नित्वादिविशिष्टस्यैव संबंधत्वेन धूमत्वादिविशिष्टस्यासंबंधत्वपातात् तादृशव्यधिक
रणसंबंधेन मतुवर्थघटकसंबंधे धूमत्वादिविशिष्टस्याभानादप्रामाण्यं। नत्रपदघटिततादृशवाक्यस्य च मतुवर्थघ
टकसंयोगादिसंबंधे तादृशव्यधिकरणसंबंधेन मतुवर्थघटकसंबंधे धूमत्वादिविशिष्टादेरभावबोधकत्वात्प्रामाण्यम
मिति न किंचिदसमंजसमित्यपि परास्तं॥ यद्यदभिधेयं तत्प्रमेयमित्याद्युदाहरणवाक्यादप्युक्तरीत्या भ्रमात्मकस राम०
ध्याभाववदवृत्तित्वरूपव्याप्त्यवगाहिबोधसंभवात्॥ विशेषदर्शनदशायां चानुमितेरनभ्युपगमेन तादृशबोधाभा ११

वेपिस्फुरतिविरहात। न च तथापि अवृत्तिगगनादौ वन्ह्याद्यभाववद्वृत्तित्वरूपव्याप्तिसत्त्वेन गगनादिलिंगकवन्ह्यादि
विधेयकानुमित्यापत्तिरिति वाच्यं। गगनमवृत्तीत्याकारकविशेषदर्शनकाले तत्र पक्षधर्मताज्ञानासंभवादेवानुमित्य
संभवात्॥ न चावृत्तित्वग्रहस्य वृत्तित्वप्रकारकग्रहं प्रत्येव ग्राह्याभावावगाहितया विरोधित्वेन गगनमवृत्तीत्याकारक
विशेषदर्शनकाले वन्ह्यभाववद्वृत्ति गगनवान्पर्वत इत्याद्याकारकपक्षविशेष्यकगगनप्रकारकपरामर्शे सत्त्वे
बाधकाभावेन तादृशानुमित्यापादनं दुर्वारमेवेति वाच्यं। तदा तादृशानुमित्यभावस्य प्रामाणिकत्वे साध्याभाववद्वृत्ति
त्वविशिष्टवृत्तिमत्त्वस्यैव व्याप्तित्वांगीकारात् तादृशव्याप्तिग्रहस्य वाऽवृत्तित्वग्रहकाले कथमप्यसंभवात्॥ वस्तुतस्त
त्प्रकारकग्रहं प्रति तद्धर्मिकाऽवृत्तित्वग्रहस्य प्रतिबंधकत्वमवश्यमंगीकार्यं तथा सति वन्हिरवृत्तिरित्याद्याकारकविशे
षणतावच्छेदकप्रकारकनिर्णयघटितायाः इच्छाविशिष्टायाऽवृत्तिवन्हिमान्पर्वत इत्याद्याकारकविशिष्टवैशिष्ट्या
वगाहिप्रत्यक्षसामग्र्याः पर्वतो वन्हिमानित्याद्यनुमितिप्रतिप्रतिबंधकत्वाकल्पने न लाघवात् तादृशसामग्री

१२ कालेवन्हिरवन्हिरित्याद्याकारकविशेषणतावच्छेदकप्रकारकनिर्णयस्यावश्यकतयातत्रचताद्दशानुमितौप्रतिवंधकत्वस्य
क्लृप्तत्वान्नतएवतदानींताद्दशानुमितिकारणसंभवात्तथागगनंवह्निमन्नीत्याकारकविशेषदर्शनकालेपक्षधर्मताज्ञा
नासंभवादेवनानुमितिः उक्तविशेषदर्शनशून्यकालेचनिरुक्तव्याप्तिज्ञानसत्वेऽनुमितौविशेषणत्तिरेकंतिव्याप्तिलक्ष
णेहेतुमत्वंननिवेशनीयमेवेतिदिक्॥ ननुव्यापकसामानाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शहेतुतामतेऽभावोन
हेतुसमानाधिकरणःप्रतियोगितानाभावीयादृश्याद्याकारकोपनीतभानस्याहृदोधादौपर्वतपक्षकेवन्ह्याद्यनुमितिसा
मग्र्या अतिरिक्तप्रतिबंधकत्वाकल्पनेनलाघवंताद्दशसामग्रीकालेव्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुम
त्तावगाहिपरामर्शस्यावश्यकतयातस्यचवाधमुद्रयातत्रप्रतिबंधकत्वस्यक्लृप्तत्वात्ततएवतदाताद्दशोपनीतभाना
द्यनुमतेः साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शकारणतामतेतुतदानींवन्ह्यभाववद्वृत्तिमान्पर्वतइ रामं०
त्याद्याकारकनिर्णयस्यसत्वेनतस्यताद्दशोपनीतभानादौप्रतिबंधकत्वस्याक्लृप्ततयाऽनुमितिसामग्रीको १२

ल्लेत्यादिविषयोपनीतभानादिवारणाय तत्तत्तादृशसामग्र्याः प्रतिबंधकत्वकल्पनेन महद्गौरवं तत्साध्याभाववदवृत्तित्व
रूपव्याप्त्यवगाहिपरामर्शहेतुतामतेपि अभावो न साध्यो यदस्माद्याकारकोपनीतभानशाब्दबोधादेः अनुमितिसामग्र्याः
प्रतिबंधकत्वाकल्पनेन लाघवमस्त्येवेतिवाच्यं॥ यतो गुरुशरीरव्याप्त्यवगाहिज्ञानप्रतिबध्यतानानात्वबहुतरव्यापकसामा
नाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शहेतुतामते बहुषुस्थलेषु सामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तं लाघवं लघुशरी
रव्याप्त्यवगाहिज्ञानप्रतिबध्यतानानामल्पतया साध्याभाववदवृत्तित्वरूपव्याप्त्यवगाहिपरामर्शहेतुतामतेऽल्पस्थ
ले तथेति व्यापकसामानाधिकरण्यरूपव्याप्तेः शरीरगौरवमेव लाघवसंपादकमिति चेन्न व्यापकसामानाधिकरण्यरू
पव्याप्त्यवगाहिपरामर्शहेतुतामतेपि घटाद्युपनीतभानादावुक्तानुमितिसामग्र्याः प्रतिबंधकत्वेऽवश्यकल्पनीये तु
नैव घटादिविषयमनिवेश्य लौकिकाप्रत्यक्षत्वादेरेव प्रतिबध्यतावच्छेदकत्वोपगमेनाभावो न हेतुसमानाधि
करणाद्याद्युपनीतभानादेरपि तादृशप्रतिबध्यतावच्छेदकाक्रांततया साध्याभाववदवृत्तित्वरूपव्याप्त्यवगा

१२ 13 हिपरामर्शहेतुतामतेपिलिङ्गप्रतिबंधकतयैवनिर्वाहेणोक्तसामग्रीप्रतिबंधकताकल्पनाधिक्याभावात् ॥ नच घटाघु
पनीतभानंजायतामित्यादिविषयमिश्रितेच्छानामुत्तेजकत्वानुरोधेनविशिष्यघटाघुपनीतभानत्वादिकमेवोक्तसाम
ग्रीप्रतिबध्यतावच्छेदकंवाच्यंतथाचक्लृप्तमेवप्रतिबंधकतयैवोपपत्तिरितिवाच्यं ॥ स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंब
धेनोक्तसामग्रीविशिष्टंयत्तदन्यत्वस्योक्तसामग्रीप्रतिबध्यतावच्छेदककोटौनिवेशेनेच्छाकालीनज्ञानेव्यभिचाराभा
वेनोक्तसामग्रीप्रतिबंधकतायामिच्छायाउत्तेजकत्वानभ्युपगमात् ॥ नचेच्छाकालइवतदुत्पकालेपिउक्तसामग्री
कालीनज्ञानापत्तिरितिवाच्यं ॥ उक्तसामग्रीकालीनज्ञानेइच्छायाहेतुत्वाभ्युपगमात् ॥ नन्वेवमपिउक्तसामग्रीका
लीनज्ञानेतथाविधेच्छायाहेतुत्वकल्पनमेवाधिकमितिवाच्यं । तुल्ययुक्त्याघटाघुपनीतभानादौविरोधिसामग्र्यंत
रप्रतिबंधकतायामपीच्छायाउत्तेजकत्वानभ्युपगमेनेच्छाधीनप्रत्यक्षेव्यभिचारवारणायस्वाव्यवहितोत्तरक्षणोत्पत्तिक हम०
त्वसंबंधेनविरोधिसामग्र्यंतरविशिष्टंयत्तदन्यत्वस्यप्रतिबध्यतावच्छेदकत्वेनेच्छाभूतकालेविरोधिसामग्र्यंतरका १२

लीनज्ञानवारणाय विरोधिसामग्र्यंतरकालीनतादृशोपनीतभानादौ तत्पक्षविषेछाप्रहितुत्वेकल्पनीये तादृशसामग्री
वैशिष्ट्यमनिवेश्य तत्पक्षविषेछाविशिष्टत्वस्यैव जन्यतावच्छेदकत्वोपगमेन तादृशकारणतयैवोपपत्तौ तादृशानुमितिसा
मग्रीकालीनतथाविधोपनीतभानादाविछाप्रहेतुत्वांतरस्याकल्पनात्॥ किंच व्यापकसामानाधिकरण्यज्ञानहेतुता
मते विशिष्टधूमत्वालोकत्वाद्यवच्छिन्नविषयतात्वेन हेतुविषयतानामनुमितिजनकतावच्छेदककोटौ निवेशाद्धेतु
तावच्छेदकभेदेन कार्यकारणभावबाधानंत्यं॥ न च किंचिद्धर्मावच्छिन्नविषयतात्वेन निखिलहेतुविषयतानानिवे
शान्नानुपपत्तिरिति वाच्यं॥ तथा सत्यालोकव्यापकवन्हिसमानाधिकरणधूमवान्पर्वत इति ज्ञानादप्यनुमित्यापत्तेः
॥ साध्याभाववद्वृत्तित्वज्ञानहेतुतामते तु वन्ह्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिनिर्णयत्वेन धूमालोका
दिनिखिलपरामर्शाणामनुगतरूपेणैव हेतुतया तत्तद्विशिष्टधूमत्वालोकत्वाद्यवच्छिन्नविषयतानामनिवेशा
न्न हेतुतावच्छेदकभेदेन कार्यकारणभावबाहुल्यमिति॥ स्यादेतत् तत्र स्फुटतावच्छायेः शरीरलाघवप्रयुक्तलाघवे

१४ तथापि व्यापकसामानाधिकरण्यज्ञानकारणतामते इव साध्याभाववद्वृत्तित्वज्ञानहेतुतामतेपि निश्चयत्वनिर्वचनाद्यनुरोधेन
हेतुतावच्छेदकानां विशिष्यनिवेशस्यावश्यकतया हेतुतावच्छेदकभेदेन परामर्शकारणताधिक्यकृत्स्नं दुष्परिहरमेव॥ तथा
हि॥ वन्ह्यभाववद्वृत्तित्वादिविशिष्टप्रतियोगिकाभावाप्रकारकत्वे सति वन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नप्रकारताशालिज्ञा
नत्वं न निर्णयत्वं वन्हिव्याप्यालोकवान्नवा पर्वतः पर्वतो वन्हिव्याप्यधूमवानित्साधारणिकनिर्णयासंग्रहप्रसंगात् तत्र व
न्ह्यभाववद्वृत्तित्वविशिष्टालोकप्रतियोगिकाभावस्य प्रकारत्वात्॥ नापि वन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नसामान्याभा
वाप्रकारकत्वे सति तदवच्छिन्नप्रकारताशालिज्ञानत्वादिकं तत्त्वं॥ वन्हिव्याप्यधूमवान्नवा पर्वत इत्यादिसंशयादप्यनुमि
त्यापत्तेः तत्र वन्ह्यभाववद्वृत्तिधूमत्वावच्छिन्नाभावस्यैव प्रकारत्वेन वन्ह्यभाववद्वृत्तित्वावच्छिन्नसामान्याभावाप्रका
रताशालिज्ञानत्वं निर्णयत्वमित्युक्तौ च वन्हिव्याप्यधूमवान्पर्वत इत्यादिनिश्चयस्याप्यसंग्रहः तत्र पक्षविशेष्यतानि साम०
रूपितधूमप्रकारतायां वन्ह्यभाववद्वृत्तित्वातिरिक्तधूमत्वावच्छिन्नत्वेन वन्ह्यभाववद्वृत्तित्वातिरिक्तधर्मानवच्छिन्न १४

त्वरूपशुद्धत्वस्याभावात् न च वन्ह्यभाववद्वृत्तिमान् पर्वत इत्यादिनिर्णयेऽपि शुद्धवन्ह्यभाववद्वृत्तित्वावच्छिन्नप्रकारता
पि फलबलात्तादृशनिर्णये स्वीक्रियते अतो न तत्संग्रहः वन्हिव्याप्यधूमवान् न वा पर्वत इत्यादिसंशये च तथाविधप्रका
रतायाः कल्पकाभावान्न ततोऽनुमितिप्रसंगः तादृशे च संशये तथाविधप्रकारतापि प्रामाण्यकीत एव वन्हिव्याप्यधूम
वान् न वा पर्वतः पर्वतो वन्हिव्याप्यवानित्याकारकतया तस्मादनुमितिस्तु तज्ज्ञानकव्याप्यसंमतिरिति वाच्यं ॥ उक्तधूमादि
गोचरसकलनिर्णयेऽनुभवविरुद्धतादृशप्रकारतायाः स्वीकारे तथाविधनिखिलनिर्णयानामेव वन्हिव्याप्यधूम
वान् न वन्हिव्याप्यवांश्च पर्वत इत्याकारकताप्रसंगात् ॥ किं च वन्हिव्याप्यधूमवान् पर्वत इत्यादिनिखिलनिर्णयानां शु
द्धवन्ह्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालित्वं न संभवति विरोधिसामग्रीकालीनवन्हिव्याप्यधूमत्वावच्छिन्न
प्रकारताशालिप्रत्यक्षं जायतामिति बाधाधीनतादृशप्रत्यक्षे तथाविधप्रकारत्वासंभवात् शुद्धवन्ह्यभाववद्वृत्तित्वाव
च्छिन्नप्रकारताशालिप्रत्यक्षं जायतामिति बाधविरहविशिष्टविरोधिसामग्र्यास्तादृशप्रत्यक्षे प्रतिबंधकत्वात् शुद्धव

१५ न्त्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिप्रत्यक्षप्रतिबंधकतायांवह्निव्याप्यधूमत्त्वावच्छिन्नप्रकारताशालिप्रत्यक्षे
च्छायाअप्रयोजकत्वेतादृशेच्छासत्वेधूमत्वादिभासकसामग्रीसत्वेशुद्धवन्ह्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालि
15 प्रत्यक्षापत्तेः तस्मादेतादृशबाधकबलाद्वह्निव्याप्यधूमवान्पर्वतइत्यादिनिर्णयानोनशुद्धवह्न्यभाववद्वृत्तित्वावच्छिन्न
प्रकारताशालित्वमिति ॥ ननुपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंसर्गावच्छि
न्नप्रकारतान्यायापर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवन्ह्यादिव्याप्यत्वावच्छिन्नप्रकारतातच्छालित्वानतत्वमेवप
र्वतत्वाद्यवच्छिन्नधर्मिकवन्ह्यादिव्याप्यवत्तानिर्णयत्वं प्रकारतावप्रकारभेदात्प्रकारतावच्छेदकभेदाच्चभिद्यतेनतु
विशेष्यादिभेदादपिमानाभावात् एवंचवह्निव्याप्यधूमवान्नवापर्वतइत्यादिसंशयीयपर्वतादिविशेष्यतानिरूपि राम०
तधूमादिप्रकारतायाः तादृशविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारत्वा १५
भिन्नत्वेनतथानततस्संशयादनुमितिः वह्निव्याप्यालोकवान्नवापर्वतः वह्निव्याप्यधूमवान्पर्वतइत्याद्यांशिकनिर्ण

येन तथाविधधूमादिप्रकारताया अभावविशेष्यतानिरूपितालोकादिप्रकारताभिन्नत्वान्न तदसंग्रहः ॥ अथ
वह्निव्याप्यधूमवान्पर्वत इत्यादिसंशये पर्वतादिविशेष्यतानिरूपितसंयोगादिसंबन्धावच्छिन्नप्रकारता
या अभावविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतातो भेद आवश्यकः अन्यथा तादृशज्ञानस्य प
र्वतादिविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नधूमादिप्रकारताशालित्वेन तत्प्रतियोगितासंसर्गा
वच्छिन्नप्रतियोगिताकधूमाभावादिप्रकारकपर्वतादिविशेष्यकपर्वतो न धूमीय इत्याद्याकारकबाधबुद्ध्यादिप्र
तिबध्यत्वप्रसंगः तादृशधूमादिप्रकारताया एव तथाविधबाधबुद्ध्यादिप्रतिबध्यतावच्छेदकत्वादिति चेत्संभव
त्येवं पर्वतादिविशेष्यतानिरूपितप्रतियोगिताविसंसर्गावच्छिन्नधूमादिप्रकारताशालिबुद्धित्वं तथाविध
बाधबुद्ध्यादिप्रतिबध्यतावच्छेदकं भवेत्तदेव न किंतु पर्वतादिविशेष्यतानिरूपितप्रतियोगितानिष्ठसांसर्गिकवि
षयतानिरूपितधूमादिप्रकारताशालिबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं एवं चोपदर्शितसंशयस्य नोक्तबाधबु

१६ ध्यादिप्रतियोगितावच्छेदकाक्रान्तत्वापत्तेः उपदर्शितसंशयस्य पर्वतादिनिष्ठविशेष्यतानिरूपितप्रतियोगितासंसर्गाव
16 च्छिन्नप्रकारताशालित्वे विसंयोगादिसांसर्गिकविषयतायामेव पर्वतादिविशेष्यतानिरूपितत्वसत्त्वे न पर्वतादिविशे
ष्यतानिरूपितत्वस्य प्रतियोगितानिष्ठसांसर्गिकविषयतायामसत्त्वात् तथा च ॥ प्रकारत्वाभेदेन कोपि दोष इति चेन्नै
वं वह्निव्याप्यधूमवान् वह्निव्याप्यधूमाभाववान्वा पर्वत इत्याद्याकारकसंशयीयपर्वतादिविशेष्यतानिरूपितधूमादि
प्रकारतायाः स्वावच्छेदकतासमनियतावच्छेदकताकाभावविशेष्यतानिरूपितधूमादिप्रकारत्वाभेदस्य सम्भवेपि व
ह्निव्याप्यधूमवान्धूमाभाववान्वा पर्वत इत्यादिसंशयीयपर्वतादिविशेष्यतानिरूपितवह्निव्याप्यधूमत्वाद्यवच्छिन्न
प्रकारताया अभावविशेष्यतानिरूपितशुद्धमे धूमत्वाद्यवच्छिन्नप्रकारतायाश्चाभेदासम्भवेन तादृशसंशयादनुमि
त्यापत्तेः। न चैतत्रापि प्रकारत्वाभेदे बाधकाभाव इति वाच्यं ॥ तथा सति वह्निव्याप्यधूमवान्न वह्निव्याप्यधूमाभाववान्वा रा० म०
इत्यादिसंशयात्तादृशसंशयस्यैव लक्षणानुपपत्तेः ॥ ननु स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वो १६

भयसंबंधेनपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपिताभावविषयतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावि
शिष्टाया प्रकारताद्वतः भावात्पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवन्ह्यादिव्याप्यत्वावच्छिन्नप्रकारतातच्छालिज्ञान
त्वमेवप्रकृते निर्णयत्वं॰ वन्हिव्याप्यधूमवान्नवापर्वतइत्यादिसंशयस्थलेच पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितधूमादिप्रका
रताया स्तथाविधोभयसंबंधेन तादृशप्रतियोगितासंसर्गावच्छिन्नधूमादिनिष्ठप्रकारताविशिष्टत्वमेवास्तितत्रस्वपदार्थो
धूमादिनिष्ठतादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारतैवतदवच्छेदकीभूतधूमत्वाद्यवच्छिन्नत्वस्य तथाविधप्रकारतानिरू
पकतादृशसंशयात्मकज्ञाननिरूपितत्वस्य च तदीयपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितधूमादिप्रकारतायांसत्वादि
तितादृशसंशयान्नानुमित्यापत्तिः॥ वन्हिव्याप्यधूमवान्पर्वतइत्यादिनिर्णयप्रतियोगितासंसर्गावच्छिन्नतथाविधधूमा
दिप्रकारतायाश्च सत्वेन स्वनिरूपकसंशयात्मकज्ञाननिरूपितत्वस्यानिर्णयीयपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरू
पितधूमादिप्रकारतायामसत्वान्नतद्घटितोभयसंबंधेन तादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारताविशिष्ट

१७ त्वस्यतथाविधव्याप्यप्रकारतापर्याप्तत्वमितिविनातादृशनिर्णयादनुमित्यनुपपत्तिः॥ ज्ञानव्यक्तिभेदेतद्विषयताभेद
मंगीकृत्यचेदंतेननिष्ठुपीपव्याप्यप्रकारतापर्याप्ततथाविधोभयसंबंधेनतादृशप्रतियोगितासंसर्गावच्छिन्नस्यप्रका
रताविशिष्टसंशयीयव्याप्यप्रकारत्वाभिन्नतयानुपपत्तिः॥ वह्निव्याप्यालोकवान्नवापर्वतः वह्निव्याप्यधूमवांश्चेत्या
द्यांशिकनिर्णयसंग्रहायस्वावच्छेदकावच्छिन्नत्वेतस्यनिवेशः॥ वह्निव्याप्यधूमवान्पर्वतइत्यादिनिर्णयसंग्रहायस्व
निरूपकज्ञाननिरूपित–त्वेतस्यनिवेशः॥ अत्रस्वावच्छेदकावच्छिन्नत्वमित्यनेनस्वावच्छेदकताव्यापकावच्छेदकताक
त्वंविवक्षणीयंअन्यथावह्निव्याप्यालोकवान्नवापर्वतः वह्निव्याप्यधूमवांश्चेत्याद्यांशिकनिर्णयादनुमित्यनुपपत्तेः॥ त
त्रापितादृशप्रतियोगितासंसर्गावच्छिन्नालोकादिनिष्ठप्रकारतायाः स्वावच्छेदकवह्न्यादिव्याप्यत्वावच्छिन्नत्वस्यपर्वत
त्वाद्यवच्छिन्नविशेष्यतानिरूपितव्याप्यत्वावच्छिन्नधूमादिप्रकारतायांसत्वेनतद्घटितोभयसंबंधेनतादृशप्रतियोगि राम०
तासंसर्गावच्छिन्नालोकादिप्रकारतावच्छेदकत्वस्यालोकत्वादौसत्वात्तत्रचपर्वतत्वाद्यवच्छिन्नविशेष्यप्रकारताबि १७

शिष्टत्वस्य तद्ज्ञानीयतादृशव्याप्यप्रकारतायां संभवात् विवक्षितेतत्तु नैवं ॥ तथा सति प्रतियोगितासंसर्गावच्छिन्नप्रकार
तावच्छेदकत्वस्याभावेन स्वावच्छेदलोकादिप्रकारतावच्छेदकत्वस्यालोकत्वादौ सत्त्वात् तत्र पर्वतत्वावच्छिन्नविशेष्य
तानिरूपितधूमादिनिष्ठव्याप्यत्वावच्छिन्नप्रकारतावच्छेदकत्वस्याभावेन स्वावच्छेदकताव्यापकावच्छेदकताकत्वघटितो
क्तोभयसंबंधेन प्रतियोगितासंसर्गावच्छिन्नतादृशालोकादिप्रकारताविशिष्टत्वस्य तथाविधनिर्णयीयपर्वतादिविशेष्य
तानिरूपितव्याप्यप्रकारतायामभावादिति चेन्न तथा सति ज्ञातिविशेषत्वादिना धूमत्वेन तत्राभावप्रतियोग्यंशे विशेष
णतया भानं तत्र ज्ञातिविशेषवदभाववान् वह्निव्याप्यधूमवांश्च पर्वत इत्याकारकनिर्णयादनुमित्यनुत्पादापत्तेः
तत्र विरुद्धोभयसंबंधेन तादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारताविशिष्टत्वस्य तथाविधव्याप्यप्रकारतायां
सत्त्वात् तादृशनिरवच्छिन्नस्वावच्छेदकताव्यापकावच्छेदकताकत्वस्य संबंधघटकत्वे तयोक्तदोष इति वाच्यं ॥ तथा
सति वह्निव्याप्यधूमवान्न वा पर्वत इत्यादिसंशयादप्यनुमित्यापत्तेः ॥ एवं ज्ञानव्यक्तिभेदेन विषयताभेदे मानाभा

१८ येन निर्णयीयपर्वतादिविशेष्यतानिरूपितव्याप्यप्रकारतापात्रविसंशयीयतादृशप्रकारताविशिष्टप्रकारत्वाभिन्नतया
१९ वह्निव्याप्यधूमवान्पर्वत इत्यादिनिखिलनिर्णयानामप्यसंग्रहप्रसंगाच्च॥ यत्तु विरोधानवच्छिन्नसंयोगादिनिष्ठसांसर्गि
कविषयतानिरूपिताया वह्न्यादिव्याप्यत्वावच्छिन्नप्रकारतानवच्छिन्नज्ञानत्वमेव प्रकृते निर्णयत्वं सत्यपि च धूमादिनि
ष्ठप्रकारतावच्छेदकसंयोगाद्यात्मकसंबंधांशे धूमाद्यभावकोटिविरोधस्य संसर्गघटकतया भानानभ्युपगमाभास
मानतया तदीयसंयोगादिनिष्ठसांसर्गिकविषयताया विरोधावच्छिन्नत्वान्न ततोऽनुमित्यापत्तिः निश्चये तु विरोधस्य सं
सर्गघटकतया भानानभ्युपगमान्न दोषः॥ अथ विरोधस्य धूमाभाववद्वृत्तित्वादिरूपतया तन्निवेशे हेतुतावच्छेद
कभेदेन परामर्शकारणताभेदो भवन्मतेऽपि दुर्वारः वह्निव्याप्यत्वावच्छिन्नाभाववद्वृत्तित्वादिरूपविरोधानव
च्छिन्नत्वस्य निवेशे च वह्निव्याप्यधूमवान्न वा पर्वत इत्यादिसंशयादप्यनुमित्यापत्तेः तत्र वह्निव्याप्यत्वावच्छिन्नाभा राम०
भाववत्त्वाकोटितया तदधिकरणे वृत्तित्वरूपविरोधस्य भानासंभवात् संशये एककोटिसंबंधांशेऽपरकोटिविरोध १८

सैवमानाप्युपगमादिति चेत्सादेवं यद्धूमाभाववद्वृत्तित्वादिरूपविरोधानवच्छिन्नत्वं संयोगादिसांसर्गिकविषयतायां
निवेश्यते तदैव न किंतु निखिलविरोधनिष्ठावच्छेदकताः वह्निव्याप्यप्रतियोगिकाभावाधिकरणनिष्ठावच्छेदकता-
निरूपकाधेयत्वनिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतात्वेनानुगमय्य तदनिरूपकत्वमेव संयोगनिष्ठसां-
सर्गिकविषयतायां निवेश्यते तत्र च न काप्यनुपपत्तिः हेतुतावच्छेदकीभूतधूमत्वालोकत्वादीनां विशिष्य निवेशा-
भावात्॥ न च तथा सति आलोकाभाववद्वृत्तित्वविशिष्टसंयोगसंसर्गकधूमप्रकारकज्ञानादनुमित्यनुदयप्र-
संग इति वाच्यं धूमवत्ताबुद्धौ आलोकाभाववद्वृत्तित्वादेः संसर्गघटकतयाभानेमाभावादिति। तन्न। तथा सति भाव-
कोटिमात्रसंसर्गघटकतयाविरोधावगाहिनस्तादृशसंशयस्य संग्रहप्रसंगात् नहि निखिलसंशये कोटिद्वयसंस-
र्गघटकतयाविरोधावगाहिनस्तादृशसंशयस्य संग्रहप्रसंगात् नहि निखिलसंशये कोटिद्वयसंसर्गांशे च वि-
रोधो भासते इति वक्तुं युज्यते विरोधविशिष्टसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकधूमाभावावगाहि बाधका

१९ लीनतादृशसंशये विरोधविशिष्टसंयोगादिसंबंधेन पर्वते धूमभानासंभवात् ॥ न च तदानीं संशय एव नोत्पद्यत इति वाच्यं
१५ ॥ शुद्धसंयोगविरोधावच्छिन्नविशेषणताभ्यां तथाविधधूमतदभावकोटिकसंशयोत्पत्तौ बाधकाभावात् ॥ एवं शुद्ध
संयोगपर्याप्तसांसर्गिकविषयतानियामकबाधाभावादिघटितसामग्र्या अपि विरोधविशिष्टसंयोगसंसर्गकज्ञा
नाव्यवहितप्राक्क्षणोत्पन्नत्वेन तस्यापि शुद्धसंयोगपर्याप्तसांसर्गिकविषयताशालितया तथाविधसंशयव्यावर्त्ते
नमप्यशक्यमेव न च शुद्धसंयोगपर्याप्तसांसर्गिकविषयताशालिबुद्धिप्रतिविरोधविशिष्टसंयोगसंसर्गकज्ञान
सामग्र्याः प्रतिबंधकत्वकल्पनान्न तथाविधसंशयव्यावर्त्तनं संभवतीति वाच्यं ॥ तथाविधानंतसामग्री प्रतिबं
धकताकल्पने महागौरवप्रसंगात् ॥ वस्तुतस्तु संशये विरोधस्य संसर्गतया भाने मानाभावेन वह्निव्याप्यधूम
वान्न वा पर्वत इत्यादिनिखिलसंशयादनुमित्यापत्तिर्दुर्वारा ॥ न च संशयस्य समुच्चयवैलक्षण्यानुरो ताम० १९
धात् संशये विरोधभानस्यावश्यमङ्गीकरणीयतया विरोधानुपस्थितिकालीनसंशये विशेषणज्ञानविरहाद्वि

रोधस्य प्रकारतया भानासंभवात्तस्य संसर्गतासिद्धिरिति वाच्यं। विरोधानुपस्थितिकाले संशयस्याप्रामाणिक
तया संशयसमुच्चयपो वैलक्षण्यानुरोधेन संशये विरोधस्य प्रकारताया एव स्वीकरणीयत्वात्॥ न तु तत्तल्लिंग
कनिखिलपरामर्शसाधारणनिश्चयत्वनिर्वचनान्यथानुपपत्त्यैव विरोधस्य संसर्गता कल्प्यत इति वाच्यं। तदसंभ
वेपि हेतुतावच्छेदकभेदेन परामर्शहेतुतासंभवात्॥ न चैवं सत्यनंतकार्यकारणभावकल्पने गौरवमिति लाघ
वात् विरोधस्य संसर्गतासिद्धिरिति वाच्यं। कार्यकारणभावलाघवबलाद्विषयतासिद्धौ तुल्ययुक्त्या संशयस्या
हतानिखिलधूमालोकादिनिश्चयमात्रनिष्ठामतिरिक्तवन्ह्यादिनिरूपितविलक्षणविषयतां स्वीकृत्य तादृशवि
षयतावत्वेन धूमालोकादिनिखिललिंगकानुमितिहेतुतापत्तेः एवमपि बाहुपदार्थघटितव्याप्त्यादिविषयतानांत
याविधनिश्चयत्वस्यैवानिवेशेन लाघवसंभवात् तस्मादेतादृशबाधकस्य जागरूकतया कार्यकारणभावलाघव
बलाद्विषयतासिद्धिरप्रामाणिकीति न किंचिदेतदिति। अत्रोच्यते॥ स्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्व

१ त्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेनप्रकारविशिष्टज्ञानत्वमेव प्रकृते व्याप्य

१० स्वावच्छिन्नवन्ह्यादिव्याप्यवैतानिर्णायकत्वं भेदप्रतियोगितावच्छेदकतावत्त्वनिष्ठावच्छेदकतानिरूपिकायाः अनुयोगि
तासंबंधावच्छिन्नावच्छेदकतातन्निरूपकाभावप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नाया
या भवति यवन्हिव्याप्यालोकवान्नवा पर्वतः पर्वतो वन्हिव्याप्यधूमवान्वेत्याद्याशिकनिर्णयोपि तथाविधोभय
संबंधेन धूमत्वरूपप्रकारविशिष्टः तत्र हि धूमाभावस्याप्रकारतयादर्शिततथाविधपर्वतत्वाद्यवच्छिन्नविशेष्य
ताकत्वसंबंधेन धूमत्ववतो भेदस्य सत्वात् धूमत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छि
न्नविशेष्यताकत्वस्यापि तत्र सत्वाच्च। अत्र चेतादृशभेदप्रतियोगितावच्छेदकताघटकसंबंधांतः पातिस्वनि
ष्ठावच्छेदकतायां स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टपत्वं द
यत्वं विशेषणं देयं अन्यथा नीलधूमाभाववान्पर्वतः वन्हिव्याप्यधूमवान्वेत्याद्याकारकनिर्णयासंग्रहप्र रामः
संगात् विशिष्टधूमत्वस्य धूमत्वानतिरिक्ततया नीलधूमत्वावच्छिन्नाभावस्यापि धूमत्वावच्छिन्नाभावत्वात् तथा १०

विषयविशेषणत्वे तु नैष दोषः तत्र हि धूमत्वनिष्ठायात्राभावप्रकारतानिरूपितधूमादिनिष्ठानुयोगितासंसर्गावच्छिन्ना
वच्छेदकतावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन नीलत्वनिष्ठावच्छेदकताविशिष्टत्वात्। व्याप्यत्वनि
ष्ठावच्छेदकताभिन्नत्वनिवेशात् धूमत्वादिनिष्ठायाः वह्निव्याप्यधूमाभावकोटिकसंशयीयाभावप्रकारतानिरूपितानु
योगितासंसर्गावच्छिन्नधूमादिनिष्ठावच्छेदकतावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन व्याप्यत्वनि
ष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टान्यत्वसत्त्वात्। एवं तथाविधस्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेशनी
यं तेन जातिविशेषत्वादिना धूमत्वादिकमभावविशेषणतापन्नधूमाद्यंशेऽवगाहमानस्य जातिविशेषवदभाववान्
र्वतः वह्निव्याप्यधूमवांश्च पर्वत इत्यादिनिर्णयस्य नासंग्रहः तत्र तादृशधूमत्वनिष्ठावच्छेदकतायां जातिविशेष
त्वावच्छिन्नत्वात्॥ एवं स्वावच्छिन्नव्याप्यतावच्छिन्नप्रकारतेतरत्वस्वावच्छिन्नत्व स्वनिष्ठावच्छेदकतानिरूपकत्वं तत्रापि
स्वनिष्ठावच्छेदकतायामुक्तविशेषणद्वयं देयं तेन वह्निव्याप्यनीलधूमवान्नवा पर्वत इत्याद्याकारकसंशयीयाभावप्रका

२१ रतानिरूपितधूमादिप्रकारतानिरूपितधूमत्वादिनिष्ठावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन नीलादि
निष्ठावच्छेदकताविशिष्टत्वेपि जातिविशेषवत्वान्नवापर्वतइत्यादिसंशयीयाभावप्रकारतानिरूपितधूमादिप्रकारतानि
रूपितधूमत्वादिनिष्ठावच्छेदकतायाः सावच्छिन्नत्वेपि वनक्षतिः॥ प्रत्यये धूमत्वादिनिष्ठायाः पक्षविशेष्यतानिरूपि
तप्रकारतावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन तादृशनीलादिनिष्ठावच्छेदकताविशिष्टत्वात्
द्वितीये तथाविधधूमत्वादिनिष्ठावच्छेदकताया जातिविशेषावच्छिन्नत्वात्। नीलधूमत्वाद्यवच्छिन्नलिंगकपरामर्शात्
वधवन्मतइवैतन्मतेपि विष्टयोरेव हेतुत्वं तथा च तन्मते शुद्धधूमत्वालोकत्वादिरूपलिंगतावच्छेदकभेदेन पराम
र्शकारणतादिभेदाभावेन लाघवस्याक्षतत्वात्॥ एतेन विशिष्य हेतुतावच्छेदकविषयतामनिवेश्य वह्न्याद्य
भाववद्वृत्तित्वावच्छिन्नप्रकारताशालिनिर्णयत्वेनानुमितिहेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिः राम० 
व्यभिचारज्ञानस्यत्वेपि उपदर्शितकारणतावच्छेदकावच्छिन्नस्य व्याप्यांशे निर्धर्मितावच्छेदकग्रहस्योत्पन्नो वा २१

धकाभावेन तदानीमनुमित्युत्पादेन तस्यानुमितिविरोधित्वाभावात् तन्न वानुमितिजनकीभूतसधर्मितावच्छेदकव्याप्तिग्रहवि
रोधित्वेनैव व्यभिचारस्य हेत्वाभासत्वमुपपद्यत इति वाच्यं। अनुमितिजनकीभूतपक्षलिंगज्ञानविरोधिज्ञानविषयत्वेनै
व हेत्वाभासत्वस्वीकारे धूमलिंगकानुमितिजनकीभूतधूमद्व्याप्तोभयलिंगकसमूहालंबनपरामर्शविरोधिज्ञानवि
षयत्वयाद्व्यत्तनिष्टवन्हिव्यभिचारस्यापि धूमलिंगकानुमितौ हेत्वाभासतापत्तेः।। तथाच यत्वयुक्तः क्वचिदनुमित्यनु
त्पादः स एव हेत्वाभासः न व्यभिचारप्रयुक्तः कुत्राप्यनुमित्यनुत्पादः तज्ज्ञानसत्वेपि निर्धर्मितावच्छेदकव्याप्तिग्रहोत्
त्पाः नुमित्युत्पादस्यावश्यकतया तज्ज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वविरहादिसंपिनिरस्तं।। निर्धर्मितावच्छेदक
व्याप्तिग्रहस्योपदर्शितोप्रमाणस्तंत्र्वेनप्रकारविशिष्टत्वाभावादनुमित्यजनकतयानुमितिजनकीभूतसधर्मितावच्छेद
कव्याप्तिग्रहविरोधित्वेनैव व्यभिचारस्य हेत्वाभासत्वोपपन्नेरिति।। अथ सवन्मते वन्हिव्याप्यधूमवान्पर्वतः पर्व
तो वन्हिव्याप्यधूमवांश्चेत्यादिसमुच्चयात्मकज्ञानादनुमित्यनुदयप्रसंगस्तस्य तादृशपर्वतत्वावच्छिन्नविशेष्यताक

२२ त्वसंबंधेन धूमत्वादिविशिष्टतयात्तद्भेदस्य तत्राभावादिति चेन्न। संशयसमुच्चययोर्वैलक्षण्योपपत्तये त्ववच्छेदकावच्छेदेनाप्यत
त्कोट्यवगाहित्वान्न संशयः सामानाधिकरण्यमात्रांशेभयकोट्यवगाहित्वान्न समुच्चयपदस्य स्वरूपमुपगंतव्यं एवं च पक्षताव
च्छेदकसामानाधिकरण्यमात्रावगाहिपरामर्शस्य पक्षतावच्छेदकावच्छिन्नत्वावगाहिपरामर्शस्य च हेतुताया भिन्न
त्वेन पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिपरामर्शहेतुतायां भेदप्रतियोगितावच्छेदकताघटकसंबंधांत
र्गताभावप्रकारतापर्यवसन्नत्वाद्यवच्छिन्नविशेषणतासंसर्गावच्छिन्नत्वस्य द्वितीयसंबंधघटकीभूतव्याप्यत्वावच्छिन्न
प्रकारतायामुक्तसंयोगसंसर्गावच्छिन्नत्वस्य च निवेशनेन तथाविधपरामर्शनिष्ठानुमितिजनकतावच्छेदकाक्रां
ततया तादृशसमुच्चयान्नानुमित्यनुपपत्तिः। केचित्तु। सर्वत्र संशये समुच्चये वैलक्षण्यं पकोट्यधिकरणतायाः सं
सर्गतावच्छेदकतया परस्परं विरोधो भासते इति वह्निव्याप्यधूमवान्न वेति संशये धूमस्य धूमाभावाधिकरणावृत्तित्व राम०
रूपविरोधावच्छिन्नसंयोगः धूमाभावस्य च धूमाधिकरणावृत्तित्वरूपविरोधावच्छिन्नविशेषणताविशेषः सं २२

स्वर्गतपाभासतते तथा च स्वावच्छिन्नप्रतियोगिताकाभावनिष्ठप्रकारतानिरूपितविरोधावच्छिन्नविशेषणताविशेष
निष्ठसांसर्गिकविषयतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकता
कभेदवत्त्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वोभयसंबंधेन किंचि
द्धर्मविशिष्टज्ञानत्वमेव हेतुतावच्छेदकाघटितसमुच्चयसाधारणं निष्कृष्टपत्वं।। ननु धूमाधिकरणवृत्तित्वादिरूपवि
रोधस्य हेतुतावच्छेदकधूमत्वादिघटितत्वात्कथं धूमत्वादिकमनिवेश्य तन्निष्कृष्टपत्वं संभवति। न च किंचिद्धर्मावच्छि
न्नावच्छेदकतानिरूपिताया अधिकरणनिष्ठावच्छेदकतातन्निरूपितायाश्चाधेयत्वनिष्ठावच्छेदकतातन्नि
रूपितायाश्चाभावनिष्ठावच्छेदकतातन्निरूपकत्वमेव विरोधावच्छिन्नत्वपदार्थः तथा च न हेतुतावच्छेदक
निवेश इति वाच्यं।। पञ्चाव्याप्यवृत्तित्वज्ञानकालीनेवह्निव्याप्यधूमवान्धूमाभाववांश्च पर्वत इति समुच्चये आ
लोकाधिकरणवृत्तित्वरूपविरोधावच्छिन्नविशेषणताविशेषस्य धूमाभावसंबंधत्वेन मानं तादृशसमुच्च

२३ यासंयुहादितिवेन्न तद्धर्मावच्छिन्नविरोधस्यैव तद्धर्मावच्छिन्नाभावसंसर्गतावच्छेदकतयाभ्युपगमांगीकारेणालोकाधिक
रणवृत्तित्वरूपविरोधावच्छिन्नविशेषणतासंसर्गकधूमाभावप्रकारकज्ञानस्यालीकतयालावच्छिन्नाभावप्रकार
तानिरूपितायाः किंचिद्धर्मावच्छिन्नाधिकरण्यावृत्तित्वरूपविरोधावच्छिन्नविशेषणताविशेषनिष्ठसांसर्गिकविषय
तातन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकत्वे दोषाभावात् तवस्ति त
स्ति स्वविशिष्टायाविशेषणताविशेषनिष्ठसांसर्गिकविषयतातन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्व
स्वाभेदप्रतियोगितावच्छेदकतावच्छेदकसंबंधत्वाभ्युपगमान्न दोषः॥ सांसर्गिकविषयतायां स्ववैशिष्ट्यं च स्व
निष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपिताभावप्रकारतानिरूपितत्व स्वनि
ष्ठावच्छेदकतानिरूपकावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठावच्छेदकता
निरूपकाभावनिष्ठावच्छेदकतावन्निरूपितस्योभयसंबंधेन आलोकाधिकरणवृत्तित्वरूपविरोधाव

रामः०
२३

च्छिन्नविशेषणतासंसर्गकधूमाभावप्रकारकसमुच्चयीयविशेषणताविशेषनिष्ठसांसर्गिकविषयतायां वह्नेस्तादृशोभ
यसंबंधेन कस्यापि धर्मस्य वैशिष्ट्यं धूमत्वस्य द्वितीयसंबंधविरहात् आलोकत्वस्य च प्रथमसंबंधविरहादिति स्या
देतत्। यत्र संशये शुद्धविशेषणताविशेषसंबंधेन धूमाभावस्य धूमाभावाधिकरणवृत्तिसंयोगादिना धूमस्याव
गाहनं तादृशसंशयकारणासंभवः तस्य धूमाभावप्रकारतानिरूपितविरोधावच्छिन्नविशेषणतासंसर्गकत्वा
भावात्।। न च सर्वत्र संशये कोटिद्वयाधिकरणयोरेव संसर्गतावच्छेदकतया कोटिद्वयस्य विरोधो भासत इति वाच्यं
।। विरोधावच्छिन्नविशेषणताविशेषावच्छिन्नप्रतियोगिताकधूमाभावाभावस्य निर्णयकाले शुद्धविशेषणता
विशेषेण धूमाभावप्रकारकस्य विरोधाव संयोगादिना च धूमप्रकारकस्य संशयस्योत्पत्तौ बाधकाभावात्
कोटिद्वयस्यैव भासकसामग्रीसत्त्वात् विरोधविषयकस्य तस्य समुच्चयत्वासंभवात्।। एवं यत्र संशये को
ध्यधिकरणयोः संसर्गतावच्छेदकत्वेन विरोधस्य न भानमपि तु स्वातंत्र्येण एककोट्यंशे परकोटिविशे

धसंबंधेनभानंतादृशसंशयवारणासंभवः॥ एवंएककोधंशेऽपरकोटिविरोधप्रकारकस्यापिसंशयस्यतवारणा
संभवति॥ एतेनस्वनिष्ठनिरूपकसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदवत्त्वमात्रप्रकारतानिरूपितस्वाव
च्छिन्नप्रकारतानिरूपितमुख्यसंयोगनिष्ठसांसर्गिकविषयतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वोभयसंबंधे
नकिंचिद्धर्मविशिष्टत्वानवत्वंनिर्णयत्वमितिपरास्तं॥ मैवं॥ स्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकाव
च्छिन्नविशेष्यताकत्व। स्वावच्छिन्नप्रकारतानिरूपितविरोधविच्छिन्नसंयोगादिनिष्ठसांसर्गिकविषयतानिरू
पितपर्वतत्वावच्छिन्नविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगिताकवच्छेदकताकभेदवत्त्वस्यापिसं
बंधमध्येनिवेशनीयत्वात्। स्वावच्छिन्नप्रकारतानिरूपितविरोधविच्छिन्नसंयोगादिनिष्ठसंसर्गिकविषय
तेत्यस्यस्वावच्छिन्नप्रकारतानिरूपितत्वस्वावच्छिन्नप्रतियोगितासंबंधावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठा
वच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठावच्छेदकतानिरूपकाभावनिरूपणष्ठावच्छे

दकतानिरूपकत्वोभयसंबंधेन स्वविशिष्टसंयोगनिष्ठसांसर्गिकविषयतेत्यर्थः ।। तेन यत्र वह्निव्याप्यधूमवान् धूमामा
ववांश्चेति समुच्चये आलोकाभावाधिकरणवृत्तित्वाद्रूपविरोधावच्छिन्नसंयोगस्य धूमसंबंधत्वेन भानं तादृशसमुच्चये यु
क्तासंग्रहः ।। यत्र संशये कोट्यधिकरणयोः संसर्गविधया न विरोधभानं किं तु स्वातंत्र्येणैककोट्यंशे विरोधसंबं
धेनापरकोट्यंशे प्रकारतया भानं तादृशस्य धूमाभावांशे विरोधसंबंधेन धूमावगाहिनः संशयस्य वारणाय स्वावच्छि
न्नप्रकारतानिरूपितत्वस्वावच्छिन्नावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयतानिष्ठाव
च्छेदकतानिरूपकाभावनिष्ठसांसर्गिकविषयतानिरूपकत्वोभयसंबंधेन स्वविशिष्टाया विशेष्यतानिरूपकत्व स्वावच्छिन्ना
भावप्रकारतानिरूपितप्रकारतावच्छेदकतावच्छिन्नविशेष्यताकत्वोभयसंबंधेन स्वनिष्ठप्रतियोगितावच्छेदकताक
भेदवत्त्वमपि संबंधे निवेशनीयं ।। एवं धूमांशे विरोधसंबंधेन धूमाभावावगाहिसंशयवारणाय स्वावच्छिन्नाभावप्र
कारतानिरूपितत्वस्वावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदक

२५ तानिरूपकाधेयत्वनिष्ठावच्छेदकतानिरूपकाभावनिष्ठसांसर्गिकविषयतानिरूपकत्वोभयसंबंधेन स्वविशिष्टविशे
25 ष्यतावत्त्वस्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठ
प्रतियोगितावच्छेदकताकभेदवत्त्वमपि संबंधेन निवेश्यं। यत्र संशये धूमाभावांशे धूमाधिकरणावृत्तित्वं प्रकारः तद्वा
रणाय स्वावच्छिन्नावच्छेदकतानिरूपकाधिकरणनिष्ठप्रकारतानिरूपिताधेयत्वनिष्ठप्रतियोगितासंसर्गावच्छि
न्नप्रकारतानिरूपिताभावनिष्ठप्रकारतानिरूपितत्वस्वावच्छिन्नाभावत्वावच्छिन्नत्वोभयसंबंधेन विशिष्टविशे
ष्यतावत्त्वस्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठ
प्रतियोगितावच्छेदकताकभेदवत्त्वं निवेश्यं। धूमांशे धूमाभावाधिकरणावृत्तित्वरूपविरोधप्रकारकस्य संशयस्य वा
रणाय स्वावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठप्रकारतानिरूपिताधिकरणनि राम०
ष्ठप्रकारतानिरूपिताधेयत्वनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतानिरूपिताभावनिष्ठप्रकारतानिरू २५

पितत्वस्यावच्छिन्नत्वोभयसंबंधेन स्वविशिष्टविशेष्यतावत्त्वस्यावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नवि
शेष्यताकत्वोभयपर्याप्तिबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वमपि निवेश्यं। वस्तुतस्तु सर्वत्र संशये समुच्चयवैलक्ष
ण्याय एककोटिकशेकोपघं तद्विरोधस्य प्रकारतयैव भानमुपेयते न च विरोधानुपस्थितिकालीनसंशये विरोधस्य प्रकारतया भाना
संभवः विरोधस्याभावरूपतया धर्माधिकरणादिरूपविशिष्टं स्वल्पपदार्थविषयकज्ञानाद्विशेष्यविशेषणमिति रीत्या तज्ज्ञानस्या
संभवादिति वाच्यं विरोधानुपस्थितिकालीनसंशयस्याप्रामाणिकत्वात् यदा संशयोनुभवसिद्धः फलवत्त्वेन तत्पूर्वं तत्र तत्
स्मरणादिरूपस्यैव विरोधज्ञानस्य कल्पनात् यदा तु प्रत्येकं कोटिद्वयोपस्थितिनिरानुविकी विरोधज्ञानाभावश्च प्रामाणिकः
तदुत्तरं विरोधज्ञानानंतरमेव स्वसमौकविलंबेन संशयः स्वसमौकविलंबस्याशयस्य निर्णीयत्वात् न च तदानीं कोटिद्वयो
पस्थितिसनंतरमेव प्रत्येककोटिविशिष्टबुद्धिसामग्रीवत्त्वात् प्रत्येककोटिविशिष्टबुद्ध्यापत्तिः इष्टापत्तौ च द्वितीयक्षणे
पि संशयानुपपत्तिः पूर्वज्ञानस्याविरोधाविषयकत्वेन निर्णयरूपतयाऽत्र्याप्यवृत्तित्वज्ञानाभावसहितस्य विपरीतके

२६ टिविशिष्टबुद्धिसामान्यप्रतिबंधकत्वापत्तिवारणाय विरोधस्य संसर्गतयाभाने विविरोधसंबंधेन एककोट्यंशे धरकोटेर्बाधे विरो
धावच्छिन्नत्वस्य योगे न तादृशविशेषणतया चकोट्यधिकरणांशे बाधे विरोधोपस्थितिमूलकालेप्रमेकसामग्रीवशात् कोटि
द्वयविशिष्टबुध्यापत्तेः॥ दृष्टापत्तौ च लक्षणदूषणविल्लेवेनापि संशयासंभवात् तदुद्धारणाय च यदि विरोधसंबंधावच्छिन्नविषयकत्वद्धर्मि
केककोटिकविशिष्टबुद्धिं प्रत्यपरकोटिविरोधभानकसामग्र्यभावविशिष्टव्याप्यवृत्तित्वेनाभावविशिष्टापरको
टिविशिष्टबुद्धिसामग्र्याः प्रतिबंधकत्वं कल्प्यते तदामपि विरोधाप्रकारकैककोटिविशिष्टबुद्धि प्रति अपरकोटिवि
रोधानुपस्थितिविशिष्टापरकोटिविशिष्टबुद्धिसामग्र्याः प्रतिबंधकत्वस्य कल्पनीयतया न तादृशापत्तिरिति॥ न
वविरोधस्य संसर्गतयैव भानं कुतो नोपेयत इति वाच्यं॥ बहुपदार्थघटितविरोधसांसर्गिकविषयतायाः कुत्रापि
ज्ञानेऽकल्पनात् लक्षणविषयतयैव संशयं समुच्चयपर्यवैलक्षण्योपपन्नावतिरिक्तविषयतायां मानाभावात् संशया समं०
तिरिक्तज्ञाने विरोधस्य सांसर्गिकविषयतायाश्चानुभवसिद्धत्वेपि संशयसमुच्चयवैलक्षण्याय विरोधस्य संसर्गता २६

संशयेस्वीक्रियमाणेतदनुरोधेनघटादेर्वैस्त्वविनिगमनाविरहात्विरोधस्यसंसर्गतापाज्ज्ञानान्तरेऽप्रसक्तत्वेघटादेरपिसांस
र्गिकविषयतापाज्ज्ञानान्तरेऽप्रसक्तत्वेनाप्रसक्तकल्पनाविरहात्॥ अथकोघोरविरोधित्वज्ञानदशायांसंशयानुत्पादस्यानु
भवसिद्धत्वेनविरोधस्यैवसंसर्गताभ्युपगमोनघटादेः तथासतिकोघोरविरुद्धत्वज्ञानदशायामपिसंशयापत्तेः घटा
दिसंसर्गकज्ञानेः विरुद्धत्वज्ञानस्याविरोधित्वादितिघटादिसंसर्गकज्ञानंप्रत्यप्यटाविरुद्धत्वज्ञानस्यप्रतिबंधक
त्वकल्पनेतुगौरवंविरोधस्यसांसर्गिकविषयतास्वीकारेतुविरोधज्ञानंप्रतिविरुद्धत्वज्ञानस्याप्रसक्तप्रतिबंधकतायै
निर्वाहइतिचेन्नविरोधसंसर्गकज्ञानंप्रत्यपिअविरुद्धत्वज्ञानस्याप्रतिबंधकत्वाकल्पनात् नहिसंसर्गांशेबाधः
प्रतिबंधकः अतिरिक्तप्रतिबंधकताकल्पनेतुघटादिसंसर्गकज्ञानंप्रत्यपिप्रतिबंधकत्वंकल्पनसंभवादित्याहुः॥
अथैतत्स्वावच्छिन्नविषयतानिरूपिताधिकरणविषयतानिरूपिताधेयत्वविषयतानिरूपिताभावविषयतावत्त्वसं
बंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपित

२१ पर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन प्रकारविशिष्टज्ञानत्वमेव निर्णयत्वं तादृशाभाववविषयतावत्त्वं च स्वनि
27 रूपकत्वस्वनिरूपिताभाववविषयताविच्छेदकावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधे
नबोध्यं॥ संशयसमुच्चयपार्थक्येन स्वाप्यानुरोधेन संशयविरोधभानमवश्यमंगीकार्यं तत्र चोपस्थितविरोधस्य प्रकारतयाभा
नमनुपस्थितस्य च संसर्गतयेति विशेषः एवं च वह्निव्याप्यधूमवानयं धूमविरुद्धधूमाभाववानित्याकारकविरोधप्रका
संशयस्य तथाविधाभानविषयतावत्त्वसंबंधेन धूमत्ववत्त्वपातद्धेदस्येतत्रासत्त्वेन तद्घटितोभयसंबंधेन प्रकारविशिष्ट
त्वाभावान्न ततोऽनुमितिः एवं सांसर्गिकविषयतादिसाधारणविषयतात्वेनाधिकरणविषयतादीनां निवेशात्तद्विरो
धसंसर्गकस्य निखिलसंशयस्य व्यावृत्तिः॥ अत्र एककालीनत्वसंबंधेन विरोधप्रकारकसमुच्चयसंग्रहाय स्वरूपसंबंधा
नवच्छिन्नप्रकारतात्वमभाववविषयतायां निवेशनीयं न तु स्वरूपसंबंधावच्छिन्नत्वं तथा सति विरोधसंसर्गकसंश रामः०
यस्य संग्रहापत्तेः॥ न चैवमपि प्रकारतया संसर्गतया वा धूमाभावादिप्रतियोगिकविरोधावगाहिनः संशयादनु २१

भित्यापत्तिरितिवाच्यं ॥ स्वावच्छिन्नविषयतानिरूपिताभावविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्ववि
षयतानिरूपिताभावविषयतावत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदांतरस्यापि कारणतावच्छे
दकतावच्छेदकसंबंधमध्ये निवेशनीयत्वात् ॥ तादृशाभावविषयतावत्वं च स्वनिरूपकत्वस्वनिरूपितविषयतावच्छेद
कावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन बोध्यं ॥ अत्र च सांसर्गिकविषयतादिसा
धारणविषयतात्वेनैवाभावविषयतादीनां निवेशात् धूमाभावप्रतियोगिकविरोधप्रकारकाणां तथाविधविरोधसं
सर्गकाणां च निखिलसंशयानामेव वारणं संभवतीति न काप्यनुपपत्तिरित्याहुः ॥ अपरे तु । अव्याप्यवृत्तित्वज्ञानोत्त
रत्वमेव संशयात् समुच्चयस्य वैलक्षण्यं न तु विषयताकृतं वैलक्षण्यं अव्याप्यवृत्तित्वं च तद्धर्मविशिष्टे तद्धर्मावच्छिन्ना
भावाधिकरणवृत्तित्वमेव ॥ एवं च सावच्छिन्नत्वस्वावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नप्रकारतानिरूपिताभाव
प्रकारतानिरूपिताधिकरणप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मवि

२८ शिष्टमास्वीयविशेष्यतात्दवच्छेदकावच्छिन्नत्वसंबंधावच्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टापास्वविच्छिन्न
प्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशे
ष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारता
निरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टज्ञानत्वमेव हेतुतावच्छेदकाघटितंनि
र्णयत्वं ज्ञाने च तत्पुरुषीयत्वांनिवेशनीयं तेन एकपुरुषीयधूमो धूमाभावाधिकरणवृत्तिरित्याप्यवृत्तित्वज्ञानो
त्तरोत्पन्नपुरुषांतरीयसंशयात्तानुमित्यापत्तिः॥ वस्तुतस्तु स्वसमानाधिकरणज्ञानाभावविशिष्टस्वीयप्रकारत्वा
भावविशिष्टत्वस्वनिरूपितत्वोभयसंबंधेन ज्ञानविशिष्टव्याप्यप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यता ताम०
शालिज्ञानत्वमेव निर्णयत्वं॥ अत्र विशिष्टत्वांतस्य स्वनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेद २८
कतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकज्ञानत्वावच्छिन्नप्रतियोगित्वसंबंधावच्छिन्नावच्छेदकता

निरूपकाभाववनिष्ठावच्छेदकतानिरूपकत्वस्वनिष्ठनिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वोभयसंबंधेन स्वविशिष्टायाः प्र
कारतानिष्ठप्रतियोगितातन्निरूपकाभाववत्त्वमित्यर्थः॥ ज्ञानाभावस्य स्वीयपूर्वोक्तोभयसंबंधेन किंचिद्धर्मविशिष्टाया वि
शेष्यतात्वावच्छेदकावच्छिन्नत्वसंबंधावच्छिन्नप्रतियोगिताकोबोध्यः। प्रकारत्वोभयस्य स्वनिरूपितप्रतियोगित्वनिष्ठ
सांसर्गिकविषयतानिरूपिताभावप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वस्वावच्छे
दकावच्छिन्नत्वोभयसंबंधावच्छिन्नप्रतियोगिताकोबोध्यः॥ धूमाभावाधिकरणे इति धूमइत्याद्याकारकोव्याप्यइतिज्ञा
नानोत्तरोत्पन्नो। वन्हिव्याप्यधूमवान् तदभाववांश्च पर्वत इत्याद्याकारकसमुच्चयेन प्रतियोगितासंबंधावच्छिन्नधू
मादिप्रकारताकज्ञानाभावविशिष्टातदानीं तादृशसमुच्चयात्मकज्ञानसमानाधिकरणस्योक्ताव्याप्यइतिज्ञान
स्य निरुक्तसंबंधेन समुच्चयात्मकज्ञानीयप्रतियोगितासंबंधावच्छिन्नधूमादिप्रकारतायां सत्त्वात्तज्ज्ञानाभावविशि
ष्टप्रकारतायास्तदानींतादृशज्ञानीयव्याप्यप्रकारतायामभावसत्त्वान्न तादृशसमुच्चयादनुमित्यनुपपत्तिः। एवं प्र

१९
29

तियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रकारतायां स्वावच्छिन्नप्रतियोगिताकाभाववत्वावच्छिन्नत्वस्वावच्छि
न्नप्रकारतानिरूपितत्वाधिकरणप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मविशिष्टाया
स्वीयविशेष्यतातदवच्छेदकावच्छिन्नत्वसंबंधावच्छिन्नस्वसमानाधिकरणज्ञानत्वावच्छिन्नप्रतियोगिताकाभावविशिष्ट
त्वं निवेशनीयं· तेन धूमाधिकरणवृत्तिर्धूमाभाव इत्याद्याकारकव्याप्यवृत्तित्वज्ञानोत्तरोत्पन्नाद्वह्निव्याप्यधूमवान् तद
भाववांश्च पर्वत इत्याद्याकारकसमुच्चयादेरपि नानुमित्यनुपपत्तिरित्यूचुः॥ नवीनास्तु सर्वत्र संशयविरोधादिभानस्य
प्रामाणिकतया समुच्चयवैलक्षण्याय संशये भावाभावोभयप्रकारतानिरूपितैकैव विशेष्यताभ्युपेयते समुच्चये च
भावाभावोभयप्रकारतानिरूपिता विशेष्यताभिन्नैव अत एव विरुद्धोभयप्रकारतानिरूपितैकविशेष्यताशालि
ज्ञानं संशय इति संशयलक्षणमुपपादयांचक्रुः॥ एवं च प्रकारताद्वयानिरूपितव्याप्यप्रकारतानिरूपितपर्वतत्वाव रामः०
च्छिन्नविशेष्यताशालिज्ञानत्वमेव निर्णयत्वं॥ प्रकारताद्वयानिरूपितत्वं च स्वनिष्ठप्रकारतानिरूपितत्वस्वभिन्न १९

निष्ठप्रकारतानिरूपितत्वोभयसंबंधेन प्रकारतानाविशिष्टान्यत्वं मतो द्वित्वस्य दुर्वचत्वे विस्मृतिः॥ न चोक्तावपि विशेष्यता संश
यसाधारणीतन्निष्ठामकसामग्र्याः संशयपूर्वसत्त्वादिति वाच्यं॥ तादृशविशेष्यताशालिबुद्धिप्रतिसंशयसामग्र्याः
प्रतिबंधकत्वास्वीकारात्॥ न चेदं पत्रगौरवमिति वाच्यं। परामर्शस्यानुमितिकारणतायां व्याप्याभावादिविशिष्टबुद्धिप्र
तिबंधकतायां भिन्नविह्निविषयकानुमितिसामग्री निष्ठविषयभेदभिन्नानंतप्रतिबंधकतायां च लघुतरानिश्चयत्वस्याव
च्छेदककोटिनिवेशाद्वच्छेदकलाघवेन बहुतरकार्यकारणभावाकल्पने न च तथाविधसंशयसामग्रीप्रतिबंधकत्वकल्प
नायां गौरवाभावात्॥ न चैतादृशरूपेणानुमितिं प्रति हेतुत्वे व्याप्यांशे निर्धर्मितावच्छेदकग्रहस्याप्यनुमितिहेतुतया
व्यभिचारस्य हेत्वाभासत्वानुपपत्तिरिति वाच्यं। कण्यायां परोपसक्तहेतौ व्यभिचारे समुद्भाविते ऽप्रामाण्यसंशयाना
स्कंदितपरामर्शानुपपत्तात्तस्य हेत्वाभासत्वसंभवात्॥ सधर्मितावच्छेदकज्ञानविरोधितामादाय तल्लक्षणसत्वाच्च॥
वस्तुतस्तु संशयसमुच्चययोर्वैलक्षण्यापत्तेः संशये भावाभावप्रकारतानिरूपितविशेष्यतयोरवच्छेद्यावच्छेदकभावः

३० स्वीक्रियते एवं च वह्न्यादिव्याप्याभावप्रकारतानिरूपितविशेष्यतानवच्छिन्नाया वह्न्यादिव्याप्यत्वावच्छिन्नप्रकारतानिरूपितप
30 र्वतत्वाद्यवच्छिन्नविशेष्यताशालिज्ञानत्वमेव निर्णयत्वं। एतेन एकत्र द्वयमिति रीत्या वह्निव्याप्यधूमवह्निव्याप्यालोका
भावादिकमवगाहमानस्य वह्निव्याप्यालोकाभाववान् पर्वतो वह्निव्याप्यधूमवानित्यादिनिर्णयस्यासंग्रहप्रसंगः तस्य व
ह्निव्याप्यधूमवान् पर्वतः वह्निव्याप्यालोकाभाववांश्च पर्वत इत्याद्याकारकसमूहालम्बनाद्वैलक्षण्यापत्तेः धूमालोका
भावादिप्रकारतानिरूपितैकविशेष्यताशालित्वस्य तत्र स्वीकरणीयत्वात्॥ अवैलक्षण्ये इष्टापत्तौ चानुभवविरोधात्॥
एवं पर्वतत्वावच्छेदेन वह्निव्याप्यधूमादिकं नीलपर्वतत्वविशिष्टे व तदभावमवगाहमाने संशये विशेष्यतयोरैक्यासंभवे न
तस्मादनुमित्यापत्तिः तदसंभवश्च। अवच्छेदकभेदात् नीलपर्वतो वह्निव्याप्यधूमवान्न वेत्यादिसंशयाद्वैलक्षण्यापावाच्चे
त्यपरास्त॥ एकत्र द्वयमिति रीत्योक्तनिर्णये भावाभावप्रकारतानिरूपितविशेष्यतयोरैक्येऽपि तयोरवच्छेद्यावच्छेदकभावस्या तम०
नङ्गीकारेणाद्यदोषाभावात्। उक्तसंशये च तादृशविशेष्यतयोरैक्यासंभवेऽप्यवच्छेद्यावच्छेदकभावे बाधकाभावे न हि ३०

णीयदोषस्याप्यभावात् । यदि च संशये प्रकारमेव कोटितारव्या विलक्षणानुमन्यते तदा तु तत्कोटितामात्रं व्याप्यप्रकारतायां विशे
षणादेयमिति न समुच्चयासंग्रह इति प्राहुः ॥ ननु भवन्मते धूमाभाववद्विशेष्यितानिरूपितत्वावच्छिन्नधूमप्रकारित्वादिरूपन्ना
नाविधाप्रामाण्यग्रहाणामेकत्रानुमितिजनकतावच्छेदककोटौ निवेशनीयतया एकविधपरामर्शकाले ऽन्यविधाप्रामा
ण्यग्रहसत्त्वे ऽनुमित्यनुपपत्तिरतस्तद्वारणाय तत्तदप्रामाण्यग्रहाभावानां प्रत्येकं निवेश्य धूमत्वालोकत्वादिरूपहेतुतावच्छे
दकभेदेन परामर्शहेतुताः कल्पनीयाः एवं च साध्याभाववद्वृत्तित्वज्ञानहेतुतामते हेतुतावच्छेदकभेदेन परामर्शहेतुतादिभे
दो दुर्वार एव ॥ न चाप्रामाण्यग्रहाभावस्यानुमितिप्रति स्वातन्त्र्येणाहेतुतया ऽनुमितिजनकतावच्छेदककोटौ तन्निवेश एव ना
स्तीति वाच्यं ॥ धूमपरामर्शसत्त्वे इदं ज्ञानं धूमाभाववति धूमप्रकारकमिति अप्रामाण्यग्रहसत्त्वे ऽनुमित्युदयप्रसंगात्
आलोकपरामर्शकाले एतादृशप्रामाण्यग्रहसत्त्वे ऽनुमित्युत्पत्तिप्रयोजिकाया अमादृशाप्रामाण्यग्रहाभाववद्वह्निव्या
प्यत्वावच्छिन्नप्रकारताशालिनिर्णयत्वावच्छिन्नाघात्मककारणत्वोपघटितसामग्र्याः प्रकृते ऽप्यक्षतत्वात् आलोक

३१ परामर्शत्वस्य जनकतानवच्छेदकत्तयात्तदवच्छिन्नाभावस्य कारणतावच्छेदकावच्छिन्नसमुदायात्मकस्य मय्यभावासंपादक
त्वात् तन्न वधूमाभाववद्विशेष्यतानिरूपितत्वावच्छिन्नधूमप्रकारितादिरूपनिखिलाप्रामाण्यग्रहानास्कंदितधूमाभाववद्वि
शेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकधूमप्रकारितात्वादिसंबंधावच्छिन्नप्रतियोगिताकोऽभावोऽ
नुमितिजनकतावच्छेदककोटिप्रविष्टव्याप्यप्रकारितायां निवेश्यते तथा च तावदभावकूटविशिष्टव्याप्यप्रकारिताशालि
निर्णयत्वेनानुमितिप्रसंगे कैव हेतुताकत्वव्यते धूमपरामर्शकाले आलोकाभाववति आलोकप्रकारकमित्यप्रामाण्यग्र
हस्य तेनानुमित्यनुपपत्तिः आलोकाभाववद्विशेष्यितानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकालोकप्रकारि
तात्वसंबंधेनाप्रामाण्यग्रहस्य तदीयव्याप्यप्रकारितायामभावेन तथाविधाप्रामाण्यग्रहाभावकूटस्य तत्र सत्वादिति वा
च्यं॥ तथा सति॥ तादृशाभावकूटस्य परस्परं विशेष्यविशेषणाभावे विनिगमनाविरहेण कारणतानंत्यादवच्छेदकगौ राम०
रवाच्च॥ न च तावत्स्वभावे पुष्पा स्येप्यहं त्रिमेकां कारणतावच्छेदकतावच्छेदकतामुपगम्य कारणत्वतदवच्छेदकत्वयो रे ३१

क्यमुपपादनीयमितिवाच्यं ।। अवच्छेदकतायाव्यासज्यवृत्तित्वात्स्याम्ब्रदूषितत्वेन तथा वक्तुमशक्यत्वात् ।। यत्तु नि
र्विलासप्रामाण्यग्रहाणां किंचिद्धर्मावच्छिन्नाभाववद्विशेष्यितानिरूपितत्वप्रकारतानिरूपितप्रकारित्वनिष्ठविशेष्य
तानिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वसंबंधावच्छिन्नत्तानत्वावच्छिन्नप्रतियोगिता
कएकरूपताभावोव्याप्यप्रकारितायां निवेश्यतद्दृतिनना नाविधाप्रामाण्यग्रहाभावनिवेशानुरोधेनहेतुतावच्छेदकभेदेन
कार्यकारणभावभेदइतितदापास्तं ।। तथाप्रत्यालोकाभाववतिधूमप्रकारकमितिप्रामाण्यग्रहदशायांधूमपरामर्शा
दनुमित्यनुत्पादप्रसंगात् तादृशविशेष्यतावच्छेदकतावच्छेदकधर्मित्वीयप्रकारित्वनिष्ठविशेष्यतानिरूपितनिरूपि
तत्वप्रकारतानिरूपितविशेष्यित्वप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताभावप्रकारतानिरूपितप्रतियो
गिप्रकारतावच्छेदकत्वस्याधिकस्यनिवेशेनवधूमाभाववति आलोकप्रकारकमालोकाभाववति धूमप्रकारकं च
दमित्यप्रामाण्यग्रहकाले धूमपरामर्शादनुमित्युपपादनासंभवात् ।। धूमत्वस्यतद्वृत्तीपतादृशप्रतियोगि

३२ प्रकारतावच्छेदकत्वात् तत्तदीयतथाविधविशेष्यतावच्छेदकतावच्छेदकत्वाच्च । किंच घटज्ञानेऽतीतधूमपरामर्शे वाऽप्रा
माण्यग्रहसत्त्वे विद्यमानधूमपरामर्शादितन्मतेऽनुमित्यनुपपत्तिरिति न किंचिदेतदिति वेन्न ॥ पक्षविशेष्यतानिरूपि
तप्रकारतावज्ज्ञानत्वेनैव परामर्शस्यानुमितिहेतुत्वं प्रकारतावत्त्वं च व्याप्यत्वधर्मितावच्छेदकतापन्नस्वावच्छेदकधर्म
विशिष्टप्रकारित्वप्रकारतानिरूपितविशेष्यत्वसामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाव
वत्त्वस्वनिरूपकत्वोभयसंबंधेन प्रकारतायां तथाविधधर्मवैशिष्ट्यं च स्वावच्छिन्नाभाववद्विशेष्यितानिरूपित
त्वावच्छिन्नत्वस्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वोभयसंबंधेन बोध्यं ॥ धूमपरामर्शकालेऽद्य
दंज्ञानं च आलोकाभाववद्विशेष्यितानिरूपितालोकप्रकारिताशालीत्यप्रामाण्यग्रहसत्त्वेनानुमित्यनुपप
त्तिस्तत्र व्याप्यत्वधर्मितावच्छेदकतापन्नस्वावच्छेदकीभूतधूमत्वविशिष्टप्रकारतानिरूपितविशेष्यत्वस्य तादृश रामं०
परामर्शे सत्त्वे न तद्घटितोभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्य तदानीं तत्र सत्त्वात् ॥ एवं घटज्ञानादा ३२

वत्तीतधूमपरामर्शे वा अप्रामाण्यग्रहसत्त्वे विद्यमानधूमपरामर्शादितोऽप्यनुमित्युत्पत्तौ न किंचिद्बाधकं ॥ तत्रापि व्याप्य
त्वधर्मितावच्छेदकतापन्नत्वावच्छेदकीभूतधूमत्वादिविशिष्टप्रकारतानिरूपितविशेष्यत्वस्य विद्यमानधूमपरामर्शे
ऽभावेन तद्दृष्टितो भयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्वस्य तादृशपरामर्शेऽसत्वात् तादृशावच्छिन्नाभाव
वद्विशेष्यितानिरूपितत्वावच्छिन्नत्वं च स्वनिष्ठावच्छेदकतानिरूपितायाप्रतियोगितासंसर्गावच्छिन्नावच्छेदकताऽत
न्निरूपितायाऽअभाववनिष्ठावच्छेदकताऽतन्निरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितविशेष्यत्वनिष्ठावच्छेदक
तानिरूपितानिरूपितत्वनिष्ठावच्छेदकतानिरूपकत्वं वाक्तवत्त्वावच्छिन्नाभावादिति वेशेधूमाभाववत्वादिनाऽभा
वांततावगाह्यप्रामाण्यज्ञानात्कंदितपरामर्शादनुमित्यापत्तेः स्वनिष्ठावच्छेदकतावत्स्वनिरूपकावच्छेदकतानि
रूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदकताभावच्छेदकताविशिष्टं यत्तद्भावाग्राह्या। तेन नीलधूमत्वस्य धूम।
त्वानतिरेकितया नीलधूमाभाववतिधूमप्रकारकमित्येतादृशज्ञानीयप्रकारित्वप्रकारतायाऽअपि धूमत्वा

३२ वच्छिन्नाभाववद्विशेष्यितानिरूपितत्वावच्छिन्नत्ववत्त्वेपि न तादृशज्ञानकालीनधूमपरामर्शादनुमित्यनुपपत्तिः नव्या
33 प्यत्वनिष्ठावच्छेदकतामनत्वस्यावच्छेदकतायां निवेशाच्च वह्निव्याप्यधूमाभाववति वह्निव्याप्यधूमप्रकारकमित्यप्रामा
ण्यग्रहकाले न धूमपरामर्शादनुमित्यापत्तिः ॥ न त्वेवं सति वह्निव्याप्यधूमाभाववति धूमप्रकारकमित्याकारकज्ञान
स्य नीलधूमाभाववति धूमप्रकारकमित्यादिज्ञानसमशीलतया ऽप्रामाण्यज्ञानानात्मकत्वात्तत्कालीनधूमपरामर्शा
दुत्पद्यमानायाः सर्वसंमततोनुमितेरनुपपत्तिः तत्र धूमत्वनिष्ठावच्छेदकतापर्याप्तिनिरूपकावच्छेदकतानिरूपितत्वसंबं
धेन व्याप्यत्वनिष्ठावच्छेदकताया नीलत्वादिनिष्ठावच्छेदकतानह्निशिष्टत्वादिति वाच्यं ॥ तादृशस्थलेऽनुमित्यु
त्पादस्याप्रामाणिकत्वे स्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वे स्वावच्छेदकतायां साध्यव्याप्यत्वावच्छि
न्नत्वस्यापि निवेशनीयत्वात् व्याप्यत्वाविषयकात्तु धूमाभाववति धूमप्रकारकमित्याद्यप्रामाण्यग्रहाणां च हप्र गमा०
गेताभावान्निवेशनीयाः तत्र च मामात्मतोऽवच्छेदकताविशिष्टामत्वेनैव स्वनिष्ठावच्छेदकतायां निवेशनी ३२

पंतत्ववच्छेदकतांशे व्याप्यत्वनिष्ठावच्छेदकतानात्वमपि प्रयोजनविरहीति॥ एवं स्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्ना
वच्छेदकताकत्वेन अपि अवच्छेदकतायां स्वाश्रयव्याप्यत्वावच्छिन्नत्वं न निवेशनीयं॥ जातिविशेषवदभाववति धूमप्रकारक
मित्यादिज्ञानकाले धूमादिपक्षमवदनुमित्युत्पत्त्या स्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेशनीयं॥ नीलधूमा
भाववदिति नीलधूमप्रकारकं जातिविशेषवदभाववति जातिविशेषवत्प्रकारकमित्याद्यप्रामाण्यग्रहाणामभावात् व
न्हिव्याप्यनीलधूमवान्पर्वतः वन्हिव्याप्यजातिविशेषवान्पर्वत इत्यादिपरामर्शानां सत्त्वे तद्वारणायमेव निवेश्यं तदिति
नतन्नदशामाप्रामाण्यग्रहदशायां तत्तत्परामर्शादनुमित्यापत्तिः। अयं वन्हिव्याप्यालोकवान्नवा पर्वतः पर्वतो वन्हिव्या
प्यधूमवांश्चेति समूहालंबनसत्त्वे तत्र वेदं ज्ञानं धूमाभाववति धूमप्रकारकमित्यप्रामाण्यग्रहे पर्वतो वन्हिमानि
त्यनुमित्यापत्तिर्दुर्वारैव तादृशपरामर्शस्य व्याप्यत्वधर्मितावच्छेदकतापन्नस्वावच्छेदकीभूतालोकत्वविशिष्टप्रकारित्व
प्रकारतानिरूपितविशेष्यत्वघटितोभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरूपकत्वैतदुभयसंबं

३४ धेन पक्षविशेष्यतानिरूपितालोकजिष्ठप्रकारतावत्वात्तत्स्यधूमत्वावच्छिन्नाभावाप्रकारकतया स्वनिष्ठप्रतियोगिता
वच्छेदकताकभेदवत्त्वस्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतानिरूपितवर्त्ततत्वावच्छिन्नविशेष्यताकत्वोभयसंबंधेन
धूमत्वरूपप्रकारविशिष्टत्वेन तथाविधनिर्णयत्वस्यापि तन्न संतत्वाच्चेति चेन्न स्वनिष्ठप्रतियोगितावच्छेदकताकभेद
वत्वपर्वततत्वावच्छिन्नविशेष्यतानिरूपितस्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतावत्वैतदुभयसंबंधेन प्रकारविशिष्टज्ञा
नत्वेनैवानुमितिं प्रतिहेतुत्वमुक्तं तेनादृशप्रकारतावत्वं वतथाविधाभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभा
ववत्वस्वनिरूपकत्वोभयसंबंधेन बोध्यं ॥ एवं चोक्तस्थले नानुमित्यापत्तिः संभवति तादृशपरामर्शे आलोकत्वनिरूपि
तस्य स्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वरूपसंबंधस्यासत्वेन स्वपदेनालोकत्वस्य धर्तुमशक्यतया धूमत्व
स्यैव धर्तुं शक्यत्वेन तदवच्छिन्नप्रकारतायास्तथाविधोभयसंबंधस्य वतन्नाभावादिति ॥ केचित्तु उपदर्शितोभयसंबंधे
न प्रकारविशिष्टज्ञानत्वरूपनिर्णयत्वशरीरस्य द्वितीयसंबंधविधया घटकीभूतायाः स्वावच्छिन्नप्रकारतात्वनिविष्टा राम० ३४

प्रामाण्यप्रकारताः स्वावच्छिन्नाभाववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्ननिरूपितत्वसंबंधावच्छि
न्नावच्छेदकताकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टप्रकारित्वप्रकारतात्वेनानुगमय्य ज्ञानीयतादृशप्रकारितानिष्ठप्र
कारतायाः स्वनिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वस्वनिरूपितविशेष्यतानाश्रयज्ञा
ननिष्ठनिरूपितत्वसंबंधावच्छिन्नप्रतियोगिताकाभाववत्वोभयसंबंधेनाभावो निवेश्यते शेषं पूर्ववत् एवं च नकाप्य
नुपपत्तिरित्याहुः॥ ननु तथापि धूमालोकादिनिखिलपरामर्शानामेकरूपेणानुमितिहेतुत्वे सिद्धिकाले धूमलिं
गकेच्छासत्त्वे सति वालोकलिंगकपरामर्शे धूमलिंगकपरामर्शं विनैव धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभाव
रूपकारणावलात् धूमलिंगकानुमित्यापत्तिः॥ एतन्मते धूमपरामर्शत्वादिनानुमितिजनकतानवच्छेदकत्वात्ता
दृशसिद्ध्यभावेन फलजननेतदवच्छिन्नस्य सहकारितविरहेण वह्निव्याप्यवत्तानिर्णयत्वावच्छिन्नस्यैव सहकारि
तया तदवच्छिन्नस्यालोकपरामर्शस्यैव तत्र सत्त्वात् अतस्तद्वारणाय धूमलिंगकानुमितित्वाद्यवच्छिन्नप्र

३५ 35 तिधूमलिंगकपरामर्शत्वादिनाहेतुत्वमवश्यंकल्पनीयं एवं च हेतुतावच्छेदकभेदेन परामर्शकारणतादिबाहुल्यं भवन्मतेपि
दुर्वारमेवेति चेन्न धूमलिंगकानुमितित्वावच्छिन्नंप्रतिधूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावत्वादिना नपक्षता
याहेतुत्वं तथा सति लिंगभेदेनानंतकार्यकारणभावकल्पने गौरवात किंतु सामान्यतः पर्वतोद्देश्यकवन्हिविधेयका
नुमितित्वावच्छिन्नंप्रतिवन्हिव्याप्यवत्तानिर्णयविशिष्टपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितत्वावच्छिन्नवन्हिविधेय
कत्वप्रकारताकानुमितिगोचरेच्छाविरहविशिष्टसिद्ध्यभावत्वादिनैकमेव हेतुत्वमुच्यते वन्हिव्याप्यवत्तानिर्णयवि
शिष्टत्वं च व्याप्तिधर्मितावच्छेदकतापन्नपक्षविशेष्यतानिरूपितस्वप्रकारतावच्छेदकधर्मावच्छिन्नलिंगकत्वप्र
कारतानिरूपितानुमितिनिष्ठविशेष्यताकत्वस्वसामानाधिकरण्योभयसंबंधेन ॥ धूमादिमात्रलिंगकत्व
प्रकारकेच्छावत्वेनैतादृशोभयसंबंधेनालोकलिंगकपरामर्शविशिष्टेति न तथाविधेच्छाकालेपि सिद्धिसत्वे आलो राम०
कपरामर्शादनुमित्यापत्तिरिति धूमपरामर्शत्वादिनाकारणताकल्पनं विनैवोपपत्तिरिति ॥ अत्र च स्वाव ३५

छिन्नलिंगकत्वप्रकारतानिरूपितत्वभिन्नधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मविशि
ष्टमत्वं तादृशानुमितिनिष्ठविशेष्यतायां निवेशनीयं अन्यथा एकत्र हृदयमितिरीत्या एकविशिष्टेऽपरवैशिष्ट्यमिति
रीत्या वा धूमलिंगकत्वालोकलिंगकत्वोभयप्रकारकानुमित्याकाले सिद्धिसत्वे तथाविधैकमात्रलिंगकपराम
र्षादप्यनुमित्यापत्तेः। अथ वन्हिव्याप्यालोकवान्नवा पर्वतः पर्वतो वन्हिव्याप्यधूमवानित्याकारकनिर्णयदशायां
सिद्धिसत्वे आलोकमात्रलिंगकेच्छासत्वे पर्वतो वन्हिमानित्यनुमित्यापत्तिः तादृशेच्छायां तथाविधस्थाने स्वव्याप्य
त्वधर्मितावच्छेदकतापन्नस्वप्रकारतावच्छेदकधर्मालोकत्वावच्छिन्नालिंगकत्वप्रकारतानिरूपितानुमितिनि
ष्ठविशेष्यताकत्वरूपसंबंधस्य सत्वेन तद्घटितोभयसंबंधेन तादृशेच्छाया वन्हिव्याप्यवत्तास्थाने विशिष्टत्वा
त्स्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वस्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वा
वच्छिन्नविशेष्यताकत्वोभयसंबंधेन धूमत्वतत्प्रकारविशिष्टत्वेन ताच्छेशस्थाने स्वानुमितिजनकता

३६ वच्छेदकीभूततथाविधनिष्ठपत्वावच्छिन्नत्वाच्चेति चेन्न व्याप्यत्वधर्मितावच्छेदकतापन्नपक्षविशेष्यतानिरूपित
त्वप्रकारतावच्छेदकत्वनिष्ठभेदप्रतियोगिता निरूपितत्वावच्छिन्नाभावप्रकारतानिरूपितपर्वतत्वाद्यव
36 च्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नावच्छेदकत्वोभयसंबंधेन स्वविशिष्टधर्मावच्छिन्नलिंगकत्वप्रकारता
निरूपिता पूर्वोपदर्शितोभयसंबंधेन किंचिद्धर्मविशिष्टानुमितिनिष्ठविशेष्यताकत्वस्य सामानाधिक
रण्योभयसंबंधेन वन्हिव्याप्यवतानिर्तीयादिविशिष्टत्वस्येच्छापानिवेशनात् अत्र प्रथमस्वपदरूपवन्हि
व्याप्यवत्तानिर्णयपरं द्वितीयस्वपदं वसंशयादावभावप्रतियोगितावच्छेदकत्वेन भासमानधूमत्वादिरूपध
र्मपरं। एवं चोक्तरूपत्वेनानुमित्सापत्तिश्च तादृशज्ञानस्य स्वावच्छिन्नाभावप्रकारतानिरूपितपर्वतत्वाव
च्छिन्नविशेष्यताकत्वसंबंधेनालोकत्ववत्मातृद्भेदस्य तत्रासत्वेनालोकत्वस्य तथात्वाद्धूमत्वस्यैव तादृ एम०
शतया तदवच्छिन्नलिंगकत्वप्रकारकत्वस्य तथाविधेच्छाया अभावेन तादृशेच्छायाः उपदर्शितोभयसंबंधेन व्याप्यव ३६
धे १

तानिरूपणविशिष्टत्वाभावात्॥ ननूक्तरूपेणासिद्ध्यभावस्य कारणत्वे तेक्वचेऽनुमितिर्जायमानापि स्याद्घटानुगते
च्छानात् तत्तद्व्यक्तित्वेनैवोत्तेजकतयातिविन्नलिंगकपरामर्षकालीनतादृशेच्छाभावकूटस्यैकत्रनिवेशेन तस्य
परस्परं विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तकार्यकारणभावानन्त्यप्रसंगः लिंगभेदेन कारणताभे
दात् तत्तल्लिंगकपरामर्षकालीनतादृशेच्छानामभावसमुदायस्य तत्तल्लिंगकानुमितिकारणतावच्छेदकको
टावेव निवेशेन तल्लिंगकपरामर्षकालीनतादृशेच्छानामभावसमुदायस्य तदन्यलिंगकपरामर्षकालीनता
दृशेच्छानामभावसमुदायस्य चैकत्रानिवेशात् तस्य तस्य च परस्परं विशेष्यविशेषणभावप्रयुक्तकार्यकारणभा
वानन्त्यप्रसंगाभावाल्लाघवं। न च तादृशाननुगतेच्छानामनुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणोत्तेजक
त्वान्न दोष इति वाच्यं॥ तथा सति घटाद्यनुमितिसामग्रीसत्त्वे पर्वतो वह्निमानिति सिद्धिसत्त्वे वह्निव्याप्यधूमा
दिमतानिर्णयमदृशायामनुमितिर्जायतामितीच्छानन्तरं पर्वतो वह्निमानित्यनुमित्यापत्तेः॥ न चेष्टापत्तिः

३७ तदानीं तादृशसिद्ध्या प्रतिवध्याभूतघटाद्यनुमित्कस्यैव तथाविधेच्छाविषयसिध्यादृष्टापत्तेः प्रयोगात्।। तासां तत्तद्व्य
क्तित्वेनोत्तेजकत्वे तु नोक्तदोषः घटाद्यनुमितिसामग्रीकालीनानुमितिजनकतामितीच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन
37 पर्वतो वह्निमानिति सिद्धिप्रतिवंधकतापामुत्तेजकत्वानभ्युपगमेन तदानीं तथाविधेच्छाभावकूटविशिष्टोप
दर्शितसिद्धिरूपप्रतिवंधकसत्त्वेन वह्न्यनुमित्युत्पादासंभवादिति चेन्न तासामप्यनुमितित्वप्रकारकेच्छात्वा
द्यनुगतरूपेणैवोत्तेजकत्वात्।। नचोक्तदोषः। घटाद्यनुमितिसामग्रीसमवधानकालीनेच्छानां तत्तद्व्यक्तित्वेन
प्रतिवंधकत्वाभ्युपगमात्।। युज्यते चैतत्।। अन्यथा तादृशेच्छानां तत्तद्व्यक्तित्वेनोत्तेजकत्वे लिंगभेदेन कार
णताभेदेपि तल्लिंगकपरामर्शकालीनतादृशेच्छानामभावसमुदायस्य तदन्यलिंगकपरामर्शकारणताभावा
नंतप्रसंगाभावेपि तल्लिंगकपरामर्शकालीनतादृशेच्छानामेव तत्कालीनतादृशेच्छानामभावसमुदायस्य वै राम०
कत्वानिवेशेन तस्य तस्य च परस्परं विशेष्यविशेषणभावप्रयुक्तकार्यकारणभावानंतप्रसंगाभावेपि तन्न ३७

ल्लिंगकपरामर्शकालीनताहृशेच्छानामेवतन्त्रच्छक्तित्वेनाभावसमुदायस्यतत्तल्लिंगकानुमितिकारणतापानिवेशेन
तस्यापरस्परंविशेष्यविशेषणभावेविनिगमनाविरहप्रयुक्तकार्यकारणभावानंत्यप्रसंगस्यदुर्वारत्वादिति एवंचसाध्याभा
ववद्वृत्तित्वरूपव्याप्यत्ववगाहिपरामर्शहेतुतामतेहेतुतावच्छेदकभेदेनपरामर्शहेतुतायाः अनुमितिसामग्रीप्र
तिबंधकतायाश्चभेदाभावप्रयुक्तलाघवमखंडितमेवेतिसादेतत्॥ पदिरुक्तरीत्याधूमालोकादिनिखिलपरा
मर्शानामेकरूपेणहेतुत्वसंभवेनसाध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतामतेननिर्णयत्वनिर्वचनाघ
नुरोधेनहेतुतावच्छेदकानांविशिष्यनिवेशआवश्यकस्तदाव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुता
मतेपितन्निवेशनंविनैवसर्वमुपपादयितुंशक्यतेतथाहि॥ स्वविशिष्टव्यापकसामानाधिकरण्यविशेष्यता
वच्छेदकतापन्नत्वावच्छिन्नत्वसंबंधेनकिंचिद्धर्मविशिष्टप्रकारतात्वेनपक्षविशेष्यतानिरूपितनिखिलहेतु
प्रकारतानुगमय्यतन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिर्णयत्वेनैवहेतुत्वमुच्यतेधूमव्याप

३८ कवन्हिसमानाधिकरणालोकवान्पर्वत इत्यादिनिर्णयस्थले न तादृशसंबंधेन केनापि धर्मेणाविशिष्टः तादृशज्ञानीयप
र्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतायामालोकत्वावच्छिन्नत्वसत्त्वेपि आलोकत्वविशिष्टव्यापकसामानाधि
करण्यविशेष्यतावच्छेदकत्वस्यालोकत्वे ऽसत्त्वेन स्वपदेनालोकत्वस्योपादातुमशक्यत्वात्॥ पर्वतत्वावच्छिन्नवि
शेष्यतानिरूपितप्रकारतायां धूमत्वावच्छिन्नत्वविरहेण स्वपदेन धूमत्वस्योपादानासंभवाच्च॥ स्वविशिष्टव्या
पकसामानाधिकरण्यविशेष्यतावच्छेदकत्वं च स्वनिष्ठावच्छेदकतानिरूपिका या हेतुप्रकारता तन्निरूपिताधिकरण
प्रकारतानिरूपिताधेयत्वप्रकारतानिरूपिताभावप्रकारतानिरूपितप्रतियोगित्वप्रकारतानिरूपितावच्छेदकत्वप्र
कारतानिरूपिताभावप्रकारतानिरूपिताधेभावप्रकारतानिरूपितवन्हित्वप्रकारतानिरूपितावच्छिन्नत्वप्रकारता
निरूपितवन्हिप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताधेयत्वंप्रकारतानिरूपितविशेष्यतावच्छेदकत्वं॰ते राम०
नेंधनव्यापकवन्हिसमानाधिकरणेंधनवान्पर्वत इत्यादिज्ञाने स्ववात्तेन वन्हिनिष्ठेंधनव्यापकत्वस्याप्रसिद्ध्यात ३८

दनवगाहित्वमपि न क्षतिः॥ नीलधूमव्यापकवन्हिसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानकारणतायां स्वनिष्ठावच्छे
दकतायां स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेनावच्छेदकताविशिष्टान्यत्वमपि निवेशनीयं॥ नीलधूमत्वावच्छिन्न
लिंगकपरामर्शादीनां तत्तत्पर्वतइवमन्मतेपि पृथगेव हेतुतास्वीक्रियते॥ एवं जातिविशेषविशिष्टव्यापकवन्हिस
मानाधिकरणधूमवान्पर्वतश्च व्यतद्द इति ज्ञानकारणतायामाधेयत्वनिष्ठप्रकारतायां स्वनिरूपकप्रकारतानिरूपितत्वसंबंधे
नाभावत्वाद्यनिष्ठप्रकारताविशिष्टान्यत्वमपि निवेशनीयमिति। अथ तथाप्येतन्मते स्वरूपतो वन्हिविधेयता
वच्छेदककानुमितेरनुपपत्तिः तथाहि एतन्मते धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवन्हित्वावच्छि
न्नसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानस्यानुमितिहेतुत्वमंगीकार्यं तत्र च वन्हित्वत्वादिनावन्हित्वे हेतु
समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वावगाहनात्तदुत्तरं वन्हित्वत्वादिरूपेण वन्हित्वविधेयता
वच्छेदककानुमितिर्नोपपत्तुमर्हति परामर्शस्यापद्दूष्यावच्छिन्नसाध्यभावच्छेदके हेतुसमानाधिकरणाभा

३९ वप्रयोगितानवच्छेदकत्वानवगाहित्वतद्रूपपुरस्कारेणैव साध्यतावच्छेदकावगाह्यनुमितिजनकत्वमितिनियमस्या
३१ वश्यमंगीकर्त्तव्यत्वात् अन्यथा धूमस्यमानाधिकरण्याभावप्रतियोगितानवच्छेदकजातिमत्समानाधिकरणधू
मवान्पर्वत इत्यादिज्ञानादपि पर्वतो वन्हिमानित्यनुमित्यापत्तेः॥ न च जातित्वावच्छिन्नेतादृशप्रतियोगितान
वच्छेदकत्वावगाहिज्ञानस्य जातित्वावच्छिन्नविधेयतावच्छेदकताकानुमितिं प्रत्येव हेतुत्वं वन्हित्वत्वाद्यवच्छिन्नेता
दृशप्रतियोगितानवच्छेदकत्वावगाहिज्ञानस्य तु तत्तद्रूपेणैव वन्हित्वविधेयतावच्छेदककानुमितित्वमेव जन्यतावच्
छेदकमिति तथाविधपरामर्शात्तादृशानुमित्युत्पत्तौ न किंचिद्बाधकमिति वाच्यं॥ तथासति वन्हित्ववत्वानित्यनु
मितेर्विलयप्रसंगात्॥ न च तथाविधानुमितित्वमपि तज्जन्यतावच्छेदकमिति वाच्यं॥ असति बाधके नियमतो
पर्वतो वन्हिमान्वन्हित्ववत्वांश्चेति द्विविधविषयताशप्लस्यनुमित्यापत्तेः। साध्याभाववद्वृत्तित्वरूपव्याप्ति सम० ३९
ज्ञानहेतुतामते च परामर्शे अभावप्रतियोगितावच्छेदकतया यथा वन्हित्वादेर्भानं तथैवानुमितावपि वन्हि

त्वादेर्भानमिति न काप्यनुपपत्तिरिति चेन्न ॥ सामानाधिकरण्यनिरूपकतावच्छेदकरूपस्वरूपतो वह्नित्वावगाही धूमस
मानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणधूमवान्पर्वत इत्याकारकपराम
र्शः स्वरूपतो वह्नित्वविधेयतावच्छेदककानुमितौ हेतुः सामानाधिकरण्यनिरूपकतावच्छेदकं तथा वह्नित्वत्वरूपेणाव
ह्नित्वावगाहिनो धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्ववत्समानाधिकरणधूमवान्पर्वत इति
परामर्शस्य वह्नित्वत्वावच्छिन्नविधेयतावच्छेदकताकानुमितिं प्रत्येव हेतुत्वं एवं च मम त्वापीति न काप्यनुपपत्तिः नव्या
स्तु स्वावच्छिन्नत्वसंयोगादिसंबंधावच्छिन्नत्वोभयाभाववद्वृत्तिसमानाधिकरणाभावप्रतियोगितासामान्यकवह्नि
त्वावच्छिन्नसमानाधिकरणधूमत्वादिरूपैव व्याप्तिर्निर्वक्तव्या तत्र च स्वपदार्थस्य वह्नित्वादेर्यथा निवेशस्तथै
वानुमितौ विषयत्वं व्यभिचारज्ञानमपि तादृशप्रतियोगिताधर्मिकतदुभयवत्ताज्ञानमिति नानुपपत्तिलेशो
पीत्याहुः ॥ केचित्तु अनवच्छेदकत्वांशे निर्धर्मितावच्छेदकपरामर्शः स्वरूपतो वह्नित्वादिविधेयतावच्छेदककानुमि

४० तौ हेतुः वन्हित्वत्वावच्छिन्नविधेयतावच्छेदकताकानुमितौ च वन्हित्वत्वावच्छिन्नेऽनवच्छेदकत्वावगाही परामर्श इति
नानुमितेर्नियमतो हि विधविषयताशालित्वप्रसंगः नित्यानवच्छेदकत्वांशे निर्धर्मितावच्छेदकबोधस्य व्यभिचारज्ञा-
नाप्रतिबध्यतया तत्रानुमितिहेतुत्वे व्यभिचारसहेतुताभासत्वानुपपत्तिरिति वाच्यं ॥ निर्धर्मितावच्छेदकबोधस्यस-
धर्मितावच्छेदकज्ञानाप्रतिबध्यत्वेपि निर्धर्मितावच्छेदकज्ञानप्रतिबध्यतया निर्धर्मितावच्छेदकस्य वन्हित्वविशेष्यक-
हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकयथार्थात्मकस्यैव व्यभिचारज्ञानस्य तादृशपरामर्शप्र-
कृते निर्धर्मितावच्छेदकबोधस्य साधारण्यस्य वन्हित्वत्वातिरिक्तधर्मानवच्छिन्नविशेष्यताकत्वरूपस्यैव वन्हित्वत्वाव-
च्छिन्नविशेष्यताकत्वस्य व्यभिचारज्ञानप्रतिबध्यतावच्छेदककोटिप्रविष्टतयोक्तदोषाभावाच्चेति वदंति ॥ ननु तथा-
पि व्यापकत्वे स्वप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्त्वं तत्र च स्व- दीधि० ४०
पदं नाभावसामान्यपरं अभावसामान्यप्रतियोग्यनधिकरणीभूतहेत्वधिकरणस्य सर्वत्राप्रसिद्धेः किं तु स्व-

परं तन्नदभावपरमेव तथा च तन्नदभावप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तितन्नदभावप्रतियोगितावच्छेदकभेदकू
टवत्साध्यतावच्छेदकवत्त्वमेव प्रकृते व्यापकत्वमिति पर्यवसन्नं एवं च भेदकूटस्य प्रातिस्विकरूपेण ज्ञानं यु
गसहस्रेणापि न संभवतीति व्यापकसामानाधिकरण्यरूपव्याप्तेर्दुर्ग्रहतया कथमनुमितौ तज्ज्ञानहेतुता न च
सामान्यतो हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकप्रतियोगिकभेदत्वादिना ज्ञानसंभवान्न तादृश
व्याप्तेर्दुर्ज्ञेयत्वमिति वाच्यं ॥ व्यभिचारज्ञानाप्रतिबध्यतया तादृशसामान्यरूपेण ज्ञानस्यानुमित्यनुपयोगि
त्वात् ॥ न च साध्याभाववद्वृत्तित्वरूपव्याप्तावपि साध्याभावे स्वप्रतियोग्यनधिकरणवृत्तित्वस्य निवेश
नीयतया तुल्यमिदं दूषणमिति वाच्यं । तत्र प्रतियोगिपदस्य साध्यपरत्वेनाननुगमाभावादिति चेदत्र केचित्
स्वप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिमद्भावान्तस्य स्वनिरूपकाभावनिरूपितत्वस्वावच्छेदकावच्छिन्ना
धिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिताविशिष्टाभावाया हेत्वधिकरणनिष्ठाधिकरणतातन्निरू

५१ पकाभावेसमर्थकतयाऽननुगमाभावेनाऽनुपपत्त्यभावः।संयोगीद्रव्यत्वादित्यादौचनाव्याप्तिस्तत्रद्रव्यादिनिष्ठ
संयोगाभाववदधिकरणतात्तथाविधोभयसंबंधेनसंयोगत्वावच्छिन्नप्रतियोगिताविशिष्टैवतदवच्छेदकसंयोगत्वा
वच्छिन्नाधिकरणतानुयोगिकत्वस्यतन्निरूपकसंयोगाभावादिनिरूपितत्वस्यचसत्वात्‌किंतुतादृशोभयसंबंधे
नप्रतियोगिताविशिष्टाभावाहेत्वधिकरणतानिष्ठाधिकरणताघटाभावाद्यधिकरणतैवतन्निरूपकघटाद्यभा
वप्रतियोगितानवच्छेदकत्वस्यसंयोगत्वेसत्वात्‌।संयोगीसत्वादित्यादौचनातिव्याप्तिःतत्रगुणाद्यात्मक
हेत्वधिकरणवृत्तिसंयोगाभावाधिकरणतायास्तादृशोभयसंबंधेनप्रतियोगिताविशिष्टाभावात्‌अधिकरणभे
देनअधिकरणताभेदस्यसर्वैरेवस्वीकृतत्वादित्याहुस्तच्चिंत्यं।उपदर्शितोभयसंबंधेनप्रतियोगिताविशि
ष्टाभावाहेत्वधिकरणतानिष्ठाधिकरणतायास्सर्वत्रैवाप्रसिद्धेःसर्वस्याएवाधिकरणतायाःउपद रामः०
र्शितोभयसंबंधेनपूर्वक्षणवृत्तित्वविशिष्टस्वाभाववद्रूपप्रतियोगिनिष्टप्रतियोगितावविशिष्टत्वात्‌।यदि ५१

हेत्वधिकरणानिरूपितनिरवच्छिन्नवृत्तित्वमेवाभाववविशेषणमुच्यते न तु प्रतियोग्यनधिकरणवृत्तित्वं एवं च प्रतियोग्य
नधिकरणवृत्तित्वस्य व्यापकसामानाधिकरण्यरूपव्याप्तिशरीरे प्रवेशाभावान्नाननुगमसंभावनेति तदपि न्न। तथा
सति कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वादिमादावव्याप्तिप्रसंगात्। वस्तुत
स्तु स्वनिरूपकानुयोगिताविशिष्टनिरूपितत्वस्वावच्छेदकविशिष्टाधिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिता
विशिष्टाभावत्वं साध्यवतिष्ठसाध्याभावाधिकरणताभिन्नत्वं वा हेतुमन्निष्ठाभावाधिकरणताविशेषणं देयमिति
नाननुगमसंभवना। नव्यास्तु हेत्वधिकरणनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वरूपमनुगतं प्रति
योगिवैयधिकरण्यनिरूपकत्वं प्रतियोगिताविशेषणं देयं। अथवा स्वावच्छेदकावच्छिन्नानधिकरणत्वसंबं
धेन हेत्वधिकरणनिष्ठप्रतियोगितावच्छेदकत्वत्वावच्छिन्नसामान्याभावघटितव्याप्तिज्ञानमेवानुमितिजनकमि
तिनाननुगमइत्याहुः॥ अथ लघुरूपसमनियतगुरुरूपेण साध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय स्वविशि

स

४२ ष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुमानाधिकरणाभावप्रतियोगितावच्छेदकं यधूमत्वं तावच्छेदकूटविशिष्टसा
ध्यत्वावच्छेदकत्वमेव व्यापकत्वमिसावधृपं निर्वक्तुं यं तथात्वं तावच्छेदकूटज्ञानं गुरुमहत्त्वेनापि न संभवतीति व्यापकसामाना
धिकरण्यरूपव्याप्तेर्दुरूहत्वे त्वे वेति वेत्र साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञाने हेतुतामते पि लघुसमनियतगुरुधर्मावच्छिन्न
साध्यकसद्धेतौ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धाऽव्याप्तेर्वारणाय साध्यतावच्छेदकावच्छिन्नवन्निष्ठा
भावप्रतियोगितानवच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वं विवक्षणीयं यत्र च साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रति
योगितानावच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वं विवक्षणीयं यत्र च साध्यतावच्छेदकावच्छिन्नवन्निष्ठभावप्रतियोगिता
नवच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वं विवक्षणीयं यत्र च साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानव
च्छेदकत्वं न साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं तथा स दाम०
ति लघुसमनियतगुरुधर्मावच्छिन्नसाध्यकसद्धेतावुक्ताव्याप्तेर्वारणासंभवात् तत्र प्रमेयवह्नित्वावच्छिन्नवन्निष्ठा ४२

भावप्रतियोगितावच्छेदकत्वात्ः स्वसमनियतवह्नित्वावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकत्वापेक्षया गुरुत्वेनाभे
दप्रतियोगितानवच्छेदकत्वात् किन्तु तत्तत्प्रतियोगितावच्छेदकत्वं तौः अनुगमग्राहकतयोपादायतावच्छेदकत्वस्वत्वमेव नन्वि
र्वाच्यं तथा च तावच्छेदकघटस्य गुरुत्वेन तज्ज्ञानासम्भवात् अशक्यतया भवन्मतेपि दुर्ज्ञेयतारूपदोषो दुरुद्धर एव गुरुधर्मस्या
भावप्रतियोगितावच्छेदकत्वमतावलम्बनेनावश्यकत्वम् एव समाधिः तस्माद्व्यापकसामानाधिकरण्यरूपव्याप्ति
ज्ञानहेतुतामपि हेतुतावच्छेदकभेदेन कार्यकारणभावानन्त्यप्रयुक्तगौरवादिरूपदोषाभावेन तज्ज्ञानहेतुत्वं नि
राबाधमेवेति मैवं। एवमपि व्यापकसामानाधिकरण्यरूपव्याप्तेर्गुरुशरीरतया तदपेक्षया साध्याभाववदवृत्तित्वरू
पव्याप्तेर्लघुशरीरतया शरीरलाघवप्रयुक्तलाघवस्यानपायेन तज्ज्ञानस्यैवानुमितिहेतुत्वौचित्यात्। एतेन स
र्वत्र साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानादेवानुमितिरिति न नियमः परन्तु क्वचित् साध्याभाववदवृत्तित्व
रूपव्याप्तिज्ञानात् क्वचिच्च व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानादपीत्यनियमपक्ष एव समीची

४३ नःतथासतिअप्रामाण्यविशिष्टवह्निमत्पर्वतनिर्णयकालीनधूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वतोवह्नि
मत्पर्वतइतिघटवानित्याद्यनंतानुमितिसामग्र्यामनंतभिन्नविषयकप्रत्यक्षादिकंप्रतिप्रतिबंधकत्वाकल्पने
नलाघवसंभवात्तदानीपर्वतविशेष्यकवह्न्यभाववत्त्वानिर्णयात्मकबाधबुद्ध्यभावाप्रामाण्यज्ञानानास्कंदितसिद्ध्य
भावादिघटितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानघटितपर्वतोद्देश्यकवह्निविधेयकानुमितिसामग्र्याःसत्त्वादवश्य
कल्प्यानुमितिसामग्र्याःस्वभिन्नविषयकप्रत्यक्षादौप्रतिबंधकत्वस्यक्लृप्ततयाततएवतथाविधप्रत्यक्षाद्यनुत्पादोपप
त्तेः।नचैवंसतिव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानादेवानुमित्युत्पत्तौनतुसाध्याभाववदवृत्तित्वरूप
व्याप्तिज्ञानादितिवाच्यं।साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानादनुमित्युपगमेपिअप्रामाण्यविशिष्टव
ह्निमत्पर्वतनिर्णयकालीनवह्न्यभाववदवृत्तिमत्पर्वतोवह्निमत्पर्वतइतिघटवानित्याद्यनंतानुमितिसा राम०
मग्र्याभिन्नविषयकप्रत्यक्षादौप्रतिबंधकत्वाकल्पनेनलाघवसंभवात्॥एवंसाध्याभावव्यापकीभूत ४३

भावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वमुपेयते तथा सत्यपुनरुक्तत्वलाघवसंभवात्।। न च नानावि
धव्याप्तिज्ञानानामनुमितिहेतुत्वेन तत्कारणतायां परस्परं व्यभिचार इति वाच्यं।। कार्यतावच्छेदककोटौ व्यवहितो
त्तरत्वसंबंधेन तत्तद्व्याप्तिज्ञानवैशिष्ट्यस्य निवेशनीयत्वादित्यविधुरात्तं।। सामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्त
लाघवस्याघवस्य तुल्यत्वेपि शरीरलाघवप्रयुक्तलाघवस्याधिक्येन तत्साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानस्यै
वानुमितिहेतुत्वस्य युक्तत्वात्।। न तु शरीरलाघवात्साध्याभाववदवृत्तित्वरूपव्याप्तिरेवानुमित्युपयोगिनीति स
युक्तं।। व्यापकतागर्भव्याप्तौ वह्नित्वादिरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभावस्य च त
त्त्वशरीरत्वेन शरीरलाघवाभावात्।। न च विशेषणस्योभयमतेतुल्यशरीरत्वेपि व्यापकतागर्भव्याप्तौ साध्यसा
मानाधिकरण्यरूपाधिकांशस्य निवेशेन गौरवं एतन्मते तदनिवेशेन लाघवमिति वाच्यं।। एतन्मतेपि पर्याप्ति
संबंधेन घटत्वादिसाध्यक घटपटोभयत्वादिहेतौ घटत्वाभाववद्वृत्तिप्रत्येकस्मिन्घटादौ घटपटोभय

४४ त्वादेः पर्याप्तिसंबंधेनावृत्तित्वपातिव्याप्तिवारणाय साध्यतावच्छेदकसंबंधेन साध्याधिकरणे हेतुतावच्छेदकसंबंधेन वृ
त्तित्वरूपसाध्यसामानाधिकरण्यस्यावश्यं निवेशनीयत्वात् द्वित्वादिति चेन्न समुदायस्य प्रत्येकानतिरिक्ततया प्रत्येका
वृत्तेः समुदायावृत्तित्वनियमेन द्वित्वादेः पर्याप्तिसंबंधेन प्रत्येकस्मिन्नपि वृत्तितयोक्तरीत्यातिरिक्तरीत्यातिव्याप्य
भावेन साध्यसामानाधिकरण्यस्यानिवेशनीयत्वात् न चैवमेको न द्वावित्यत्र बोधानुपपत्तिः एकस्मिन्नपि
द्वित्वादिपर्याप्तेः सत्वेन पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदस्य बोधयितुमशक्यत्वादि
ति वाच्यं ॥ द्वित्वादिपर्याप्तेरुभयादिवृत्तिधर्मावच्छेद्यत्वनियमेन तद्भिन्नावच्छेदकैकमात्रवृत्तिधर्मावच्छेदे
न तद्भेदस्य तद्वृत्तित्वे बाधकाभावात् ॥ अथैवं द्वित्वादेः पर्याप्त्याख्यसंबंध एव प्रमाणाभावः । इमौ
द्वावित्यादिप्रतीतेः समवायादिसंबंधविषयकत्वेनैवोपपत्तेः ॥ एको द्वावित्यादिवित्यादिप्रतीतेरुक्तयुक्त्या राम०
दे द्वित्वाद्यनवच्छेदकत्वादेव वारणात् अन्यथा पर्याप्त्यङ्गीकारेप्युक्तरीत्या तादृशप्रतीतेर्दुर्वदित्वात् तदि ४४

तित्वेन द्वित्वादिकं द्वयादौ पर्याप्तमिति प्रतीत्या तत्सिद्धेः ॥ वस्तुतस्तु पर्याप्त्याख्यविलक्षणसंबंधो ऽप्रामाणिक ए
व ॥ इत्थं प्रतीत्या द्वित्वादौ द्वित्वाद्यवच्छिन्नवृत्तिकत्वस्य विषयीकरणात् अन्यथा पर्याप्त्यनंगीकारेपुनः रीत्या ऽसि नि र्वा
हात् ॥ न चाभेदेनावच्छेद्यावच्छेदकभावानुपपत्तिरिति वाच्यं ॥ द्वित्वादिव्यक्तीनामेकस्य द्वित्वादेर्वृत्त्यावच्छेदकस्यावच्छेदक
त्वे बाधकाभावात् ॥ न च पर्याप्त्यनंगीकारे एको न द्वाविति नाना नात्वे ॥ त्यादिप्रतीतेः समवायसंबंधावच्छिन्नप्र
तियोगितावच्छेदकत्वाकभेदविषयकत्वमेव वाच्यं तच्च न संभवति एकस्मिन्नपि द्वित्वादिसमवायसत्वादि ॥
ति वाच्यं ॥ एकस्मिन् द्वित्वादिसमवायसत्वेपि द्वित्वादावुभयादिप्रवृत्तिधर्मावच्छिन्नत्वोपगमेन तदनव
च्छेदकैकत्वावच्छेदेन तद्वतो भेदस्य वृत्तौ बाधकाभावात् अन्यथा पर्याप्त्यनंगीकारेप्यगतेरित्यस्यास्सहृदा
देदितत्वात् ॥ अत्र नव्याः आकाशविस्तादिवाक्यजन्यशाब्दबोधस्य भ्रमत्वोपपादनाय पर्याप्त्याख्यवि
लक्षणसंबंधस्वीकार आवश्यकः ॥ तादृशबुद्धेः समवायविषयकत्वे घटाकाशादिवृत्तिद्वित्वादि समवा

४५ यस्याकाशादेस्सत्वेन भ्रमत्वोपपादनस्याशक्यत्वात्। न चोभयवृत्तिधर्मावच्छेदेनैव समवायेन द्वित्वस्याकाशादेर्वृत्ते
W5 राकाशत्वाद्यवच्छेदेन तत्र न संबंधेन तदभावसत्वात् तद्भ्रमत्वमुपपद्यत इति वाच्यं। हस्तः संयोगवानित्यादिज्ञानस्य भ्रम
त्वापत्तिनिवारणाय निरवच्छिन्नतदभाववति तत्प्रकारकज्ञानस्यैव भ्रमत्वात् आकाशत्वाद्यवच्छिन्नद्वित्वाभाववत्
तामादाय भ्रमत्वस्योपपादयितुमशक्यत्वात्। न च पर्याप्तेः संसर्गतोपगमेऽपि तद्दोषतादवस्थ्ये घटाकाशादौ द्वि
त्वादेः पर्याप्तिसत्वे प्रत्येकमाकाशादौ पर्याप्तिर्नास्त्येव तस्य वक्तुमशक्यत्वात् प्रत्येकस्योभयानतिरिक्तत्वादिति
वाच्यं उद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेरेव संसर्गतोपगमात् तु आकाशत्वादिव्याप्यतायाश्च द्वित्वादिपर्याप्त्यभा
वसत्वात्॥ न चैवमुद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य संसर्गतोपगमे नैव निर्वाहे किं पर्याप्त्येति
वाच्यं। तथासति घटद्वित्वादिवाक्यजन्यबोधस्यापि भ्रमत्वापत्तेः॥ समवायस्यैकत्वेन घटादिनिष्ठस्य द्वित्वादिसम रा॰म॰
वायस्य पटादावपि सत्वेन घटत्वाद्यव्याप्यत्वात्॥ न चोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गतो ४५

पगमेपि कथं भ्रमत्वोपपत्तिः तादृशविशिष्टसंसर्गस्याप्रसिद्धत्वेन तेन संबंधेन भ्रमत्वायोगादिति वाच्यं ॥ द्वित्वादि
पर्याप्त्यभावस्यैव प्रसिद्धस्याकाशत्वादिव्याप्यत्वस्य भ्रमस्वीकारात् ॥ न चैवं संबंधांशे एव भ्रमत्वं फलितं तत्र च न संभ
वति तदभाववद्विशेष्यतानिरूपिततत्प्रकारतावद्विशालिज्ञानत्वस्यैव ॥ भ्रमत्वया च संबंधांशे विशेष्यत्वप्रकार
त्वाभावादिति वाच्यं । सांसर्गिकविषयतापन्नविशेष्यतात्वविशिष्टप्रकारतात्वयोरंगीकारेणोक्तदोषाभावात् ॥
न चैवं तदभाववत्ताज्ञानकाले तत्संसर्गकज्ञानस्याप्यनुदयप्रसंगः इति वाच्यं इष्टत्वात् तत्र तदभाववत्ताज्ञानप्र
तिबध्यतावच्छेदककोटौ प्रकारतापन्नसांसर्गिकविषयताभिन्नत्वनिवेशेनोक्तदोषवारणसंभवाच्चेत्या
हुस्तच्चिन्त्यं । एवमपि यत्रैकघटतात्पर्येण घटाविति वाक्यप्रयोगस्तत्र तादृशवाक्यजन्यशाब्दबोधस्य भ्रम
त्वोपपादनासंभवात् घटद्वयवृत्तिद्वित्वस्य घटत्वव्याप्यपर्याप्तिसंबंधेनैकघटेपि सत्वात् । अथ पर्याप्त्यानी
यत्प्रकारतानिरूपितविशेष्यतात्वपन्निरूपिताधिकरणतावच्छेदकं किंचिद्धर्मव्यापकतानवच्छेदकं

४६ तद्धानीयतत्प्रकारताकत्वमेव तद्धूमस्य तद्धूमत्वावाख्यं प्रकृते च घटद्वयवृत्तिद्वित्वप्रकारतानिरूपितविशेष्यत्वपेक घ
टएव तादृशद्वित्वाधिकरणतावच्छेदकद्वित्वांतरं च घटांतरेपि नेति तद्व्यापकतानवच्छेदकत्वं तादृशविशेष्यतात्व
सेति तादृशवाक्यजन्यशाब्दबोधस्य भ्रमत्वोपपादनसंभवेन तादृशपर्याप्तिः संसर्गतास्वीकारस्य व्यर्थत्वात् घटाकाशोभ
यद्वित्वद्वित्वप्रकारतानिरूपितविशेष्यत्वस्याकाश एव सत्त्वेन तादृशद्वित्वाधिकरणतावच्छेदकद्वित्वांतरस्य च घटे
विसत्त्वेन तादृशद्वित्वप्रकारतानिरूपितविशेष्यस्य तस्य तादृशद्वित्वनिरूपिताधिकरणतावच्छेदकद्वित्वांतररू
पकिंचिद्धर्मव्यापकतानवच्छेदकत्वात् । तस्मात्साध्याभाववद्वृत्तित्वरूपव्याप्तेः साध्यसामानाधिकरण्यनिवे
शस्यानावश्यकतया तद्निवेशाप्रयुक्तशरीरलाघवानपायेन तद्व्याप्यवगाहिपरामर्श एवानुमितिहेतुर्न राम०
तु गुरुशरीरव्यापकसामानाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शोनुमितिहेतुरिति सिद्धमिति कृतं पल्ल ४६
वितेन ॥ ॥ तव्यशीत्या परामर्शोनुमाहेतुत्वमद्भुतं । महादेवेन गदितं तनोतु विदुषां मुदं ॥१॥ अतिमा